आदिपर्वप्रारंभः

श्रीगणेशायनमः॥यंवक्रेमुकुराद्वेद्रियमानेमायाःपराद्दृश्यतेनिजुस्तत्स्थविमादिनापिचविराट्सत्रेशभावंगते॥तंप्रत्य
ग्द्दगद्दश्यमक्षरमणंत्यक्तोपनेत्रत्रयःश्रीगोपालमुपास्महेऽतिशिरोवंशीरवैर्दर्शिते॥१॥बाल्येनाभिभाषीबहिरुदवसि
तेषातिनकोऽप्रतिष्ठोमीमांसाप्रातिहार्यभंजनिगुणगणंयस्यसंख्यातिसांख्याः॥हत्पीठेयोगमुद्रेनिहितमुपनिषद्वाहदंद
परंमेभाग्यंश्रीलक्ष्मणार्योजगतिविजयतेयस्यलेशाःशिवाद्याः २ हरिविधिवसिष्ठशक्तिपराशरव्यासशुकदेवान् वैशंपाय
नमुग्रश्रवसंवनुमःपुराणगुरुमुख्यान् ३ कणभक्षमक्षचरणंजैमिनिकपिलोपतंजलिंचनुमः श्रीमद्यामवोंबुधिनय
सीकरवर्षिणोमुदीरान् ४ सर्वविद्येशतामाविश्चिकीर्षुःपूर्वपुरुषौ श्रीनारायणधीरेशरूपौहरिहरौनुमः ५ बहूनसमा
नत्यविभिन्नदेश्यान्कोशान्विनिश्चित्यचपाठमग्र्यं प्राचांगुरूणामनुसृत्यवाचमारभ्यतेभारतभावदीपः ६ दीकांतराणींडुरवि
प्रभाणिबाह्यार्थरत्नानिचकासयंतु अंतर्निगूढार्थचयप्रकाशोदीपःक्षमोभारतमंदिरेस्मिन् ७ ईशप्रसादादवितुंस्ववंश्या
नूभगीरथेनेवमयाप्रणीता एषामहाभारततीर्थगंगालोकत्रयीजाड्यमलंधुनोतु ८ उन्मानेधिहकोशवित्रहबलंपद्येषुनेव
श्चितंगभीरेषुनसेतवोनविहिताःकूपाननस्फोटिताः नष्टिन्नानतमश्चराननततिर्भक्तानानाद्रुहिनानोदीनाविभीषणाश्चविं
हिताःश्रीलक्ष्मणार्यश्चितैः ९ इहखलुभगवान्पाराशर्यःपरमकारुणिकोमंदमध्यममतीननुगृह्णंचतुर्दशविद्यास्थ
नरहस्यान्येकत्रप्रदर्शयिषुर्महाभारताख्यमितिहासंप्रणेष्यन्नारीप्सितस्ययंथस्यनिष्प्रत्यूहपरिसमाप्तयेप्रचयगमनायच
कृतमंगलंशिष्यशिक्षायैश्लोकरूपेणनिबध्नन्नर्थात्तत्रेक्षावत्प्रवृत्त्यंगमभिधेयादि दर्शयति नारायणमिति नरोविद्या ॥ १ ॥

वच्छिन्नचैतन्यंजीवः तेनविषयीकृतेऽनवच्छिन्नचैतन्यरूपेब्रह्मणिशुक्तौरजतवत्कल्पितंचराचरंस्थूलंशब्दाद्यंनारं तदेवअयनं
शुक्तीदमंशस्यरजतमिवप्रवेशात्स्थानंयस्यसनारायणःस्वस्मिन्कल्पितस्यसत्तास्फूर्तिप्रदत्वेनकारणीभूतइत्यर्थः यथोक्तं आ
पोनाराइतिप्रोक्ताआपोवैनरसूनवः अयनंतस्यताःपूर्वंतेनानारायणःस्मृतइति तंनारायणंनमस्कृत्य तथानरंउक्तरूपं
नमस्कृत्य एवंविशिनष्टि नरोत्तममिति जीवोहिचेतनत्वेनजडवर्गादुत्कृष्टः ततउत्कृष्टतरःकारणात्मानारायणः ततो
ऽप्युत्कृष्टतमंनिरुपाधिचैतन्यं सत्यंज्ञानमनंतंब्रह्म विज्ञानमानंदंब्रह्मेत्यादिश्रुतिप्रसिद्धं तदेवनरोत्तमस्यनिरस्ताविद्यस्य

ॐ नारायणंनमस्कृत्यनरंचैवनरोत्तमं देवीसरस्वतीचैवततोजयमुदीरयेत् १ श्रीकृष्ण

जीवस्यनिष्प्रपंचपारमार्थिकरूपमितियुक्तंतन्नोत्तमत्वविशेषणं मयोक्तं पिंडब्रह्मांडनेतृत्वान्नरोजीवेश्वरावुभौ तयोश्चन
यनाच्छुद्धंब्रह्मापिनरउच्यते नराज्ञानमपांकार्यंनारंब्रह्मांडमिष्यते तद्यस्यवसतिस्थानंतेनारायणोविभुः स्वाविद्यास्पृ
ष्टपिंडेनतादात्म्ययोगतोनरः सजीवःसपरंब्रह्मनरोत्तमपदाभिधं तद्योतिकांगिरंनत्रातोव्याप्तस्थैर्यवसन् संसारजयिनंग्रंथंजयनामान
मारभेदिति एवंजीवाविद्याकल्पितत्वाज्जगतोमिथ्यात्वं ब्रह्मणश्चतत्रसत्तास्फूर्तिपदत्वेनसत्यत्वं जीवस्यतदभिन्नत्वंचेतिविषयोदर्शितः
अविद्यानिवृत्तौतत्कृतस्यप्रपंचस्यैकालिकबाधादात्यंतिकीअनर्थनिवृत्तिःप्रयोजनं अर्थात्कामोऽधिकारी ग्रंथस्योक्तविषयस्यचसा

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

प्यत्तापकभावः संबंधइतिचदर्शितं देवीनारायणनरोत्तमत्रयोननीसरस्वतीचनमस्कृत्यैवततोव्याख्यास्यैवसरस्त्यापरमकारुणिकयाजन
बोधायश्रविष्टः जयेजयोनामेतिहासोयमितिवक्ष्यमाणत्वाज्जयसंज्ञेभारताख्यमितिहासंवा अष्टादशपुराणानिरामस्यचरितंतथा का
र्ष्णवेदंपञ्चमंचयन्महाभारतंविदुः तथेवविष्णुधर्माश्चशिवधर्माश्चशाश्वताः जयेतिनामतेषांचप्रवदंतिमनीषिणइतिभविष्यवचनात्
पुराणादिकंवा चतुर्णांपुरुषार्थानामपिहेतौजयोस्त्रियामितिकोशादन्यंवासर्वपुरुषार्थप्रतिपादकंयेयंशारीरसूत्रभाष्यादिरूपंउदीरयेतउ
च्चारयेत् अत्रलिङ्गमंगलाचरणग्रंथपरिसमाप्तावश्यकत्वंदर्शयतारचनारंभेस्मृतरांदर्शिते १ नन्वेतन्नपठनीयंनव्याख्येयंचपौरुषेयत्वा
त् पुरुषेषुचस्खलनविप्रलंभकयोःसंभवादितिचेन्न सर्वज्ञेषुवेदैकप्रमाणेषुमन्वादिषुतदसंभवात् पूर्वतंत्रेचस्मृत्यादेर्धर्मेप्रामाण्यस्यसिद्ध
त्वात् यस्यांतुस्मृतौलोभमूलकत्वंप्रत्यक्षंदृश्यते यथावैसर्जनहोमीयंवासोध्वर्युःपरिगृह्णातीतितत्रास्मृत्प्रामाण्यं नन्वष्टकाःकर्तव्याः
प्रपाःकर्त्तव्याऊर्ध्वपुंड्रंमृदाकुर्यादित्यादीनांतासांलोभमूलकत्वादर्शनात् यांजनाःप्रतिनंदंति धन्वन्निवप्रपास्यसित्वमग्रे श्रोणामेकउ
दकंगमवाजतीतिमंत्रलिंगानुमितविधिमूलकत्वाच्च धन्वनूधन्वनिनिरुदकप्रदेशो किमुश्रेष्ठःषल्नाऽभ्रंवंत्विष्टवंतमित्यनुक्रमणिकायां
किमुश्रेष्ठइतिसूक्तस्यचतुर्दशर्चस्यऋभुर्देवत्यस्यनवमदशम्यावेतेऋचौ आपोभूयिष्ठाइत्येकोअब्रवीदग्निर्भूयिष्ठइत्यन्योब्रवीत् वर्धयंतौ
बऊभ्यःत्रैकोअब्रवीदृतावदंतश्चमसांश्चपिशत १ श्रोणामेकउदकंगमवाजतिमांसमेकःपिशंतिसूनयाभृतं आनिम्रुचःशकृदेकोअ
पाभरत्तिंस्रिसुत्रेभ्यःपितराप्रयावृतुः २ अत्रऋभ्याख्यदेवतास्तुतिव्याजेनश्रेयःसाधनानिविधीयंते हेऋभवःभवंतोमध्येएकःकश्चिन्नीर्या राम
श्रयेणैवप्राप्तदेवताभावः आपएवभूयिष्ठाउत्कृष्टतमाइत्यब्रवीत् एवंयज्ञादिनाप्राप्तदेवताभावश्चान्यः अग्निर्भूयिष्ठइत्यब्रवीत् वर्ध २

यंतोऽवपूर्वाद्भुजोविचूत्यत्ययेभागुरिमतेनाऽकारलोपेचेदंरूपं स्वरादिपाठादव्ययत्वं निपातत्वादाद्युदात्तत्वेन वधत्रत्ययंपालनार्थे श्रवग
त्यधारयतीतियोगात् तदर्थंयंगछंतीचेतोवृत्तिंदयोबऊभ्यःप्रमाणेभ्योनिश्चित्यएकःदयायैवप्राप्तदेवताभावःप्रकर्षेणअब्रवीत् तेपूर्वक्र
ताऋतानिसत्यान्येवैतान्यवादीभिदेवताभावप्राप्तिसाधनानिवदंतउपदिशंतःयत्तेषुचमसानूसोमयुक्तान्पिशंतव्यभजंत अत्रत्येवमुपाख्या
यतेऋभवोनामत्रयोदेवाः एकंचमसमासेदुः तत्रवन्हिरपितद्रूपंगृहीत्वाआगतः तेतंअतिसारूप्यात्पृथक्कृत्वाज्ञातुमशक्नुवंतः एकंचमसंचतुर्धा
व्यभजंतेति यद्वा सत्यवादिनामेवतीर्थादिफलदमितिऋतावदंतइत्यस्यार्थः श्रोणामेकः हेऋभवःभवंतोमध्येएकःश्रोणांश्लक्ष्णांगांमृदंगो
पीचंदनादिरूपांतीर्थनिकटस्थांमुख्यकर्मक्षमांप्रतिउदकंजलंगोपंकर्मश्वाजतिश्रवगमयतिश्रंतर्भावितण्यर्थोयं श्रोणागांउदकेनमिश्रयतीत्य
र्थः श्रोणागांरक्तचंदनादिरूपांवा तथाएकःसूनयाहिंसयातत्कर्त्रा आभृतंआहृतंमांसंगोरोचनाख्यंपिशंतिउदकेनसहेतिशेषः निम्रुचःनि
तरःमस्तंगच्छतःदग्धेधनस्यैनेःसंबंधिशकृत्गोमयं शुष्कगोमयोत्थंभस्मेतियावत् अपाभरतअपाहृतवान् अत्रापुदकेनसहेतिशेषः
व्यवहिताश्चेतिछंदसिव्यवहितेनापुपसर्गेणक्रियायाःसंबंधः हत्यहोर्मश्छंदसीतिहस्यभः एतानिमंत्रपदानिअसंपूर्णार्थत्वात् स्वार्थलाभा
यब्राह्मणमपेक्षंते इषेत्वोर्जेत्वेत्यादिमंत्रवत् तत्रतद्यथाइषेत्वेतिशाखामाछिनत्तिऊर्जेत्वेत्यनुमार्ष्टीतिब्राह्मणानुसारात् हेशाखेत्वांछि
षेअन्नायछिनद्मीतिऊर्जेपशुभ्यःअनुमार्ज्मीतिव्याख्यातं एवमिहापिवासऋदेवोपनिषतंत्रपुराणोपबृंहणात् ऊर्ध्वपुंड्रार्थंश्लक्ष्णांमृदं
जलेनमिश्रयेदितिव्याख्येयं तथाकालाग्निरुद्रबृहज्जाबालाद्युपनिषद्ब्राह्मणतंत्रपुराणोपबृंहणानुसारात्त्रिपुंड्रंकुर्ज्जनिम्रुचःशक्र
दणभरेदितिचव्याख्येयं एवमितरस्याऽपिपादस्यब्राह्मणमंत्रलिंगात्उपबृंहणस्मृतिभ्यश्चाष्टकाप्रपाविधिवदनुमेयं तथाचशेणा

मितिपदस्यरक्तामितिव्याख्यानेसोरशाक्तागणेशानांरक्तमेवपार्थिवंद्रव्यंपुंस्त्वंयेनतत्तत्रेविधीयंते वैष्णवानांपीतं शैवानांभस्मेति अनेनतत्तत्पुंस्त्वविशेषोपलक्षितनत्तद्देवताभजनेनापिदेवताभावंप्राप्नुवंतीतिविधीयंते केवलवैदिकानांतुश्रौणाप्लक्ष्णामितिव्याख्यानेनत्रितयस्यापिसमुच्चयः स्वात्वापुंड्रंमृदाकुर्यात्तऊर्ध्वंचैवतुभस्मना देवान्विप्रान्समभ्यर्च्यवंदनेनसमाचरेदित्यादिस्मृतिभ्यः अत्रगोरोचनाग्रहणंचंदनाद्यष्टगंधोपलक्षणार्थं एतेषांविकल्पसमुच्चयपक्षाणांपितृपैतामहपरंपराक्रमेणव्यवस्थामाह किंस्वित्पुत्रेभ्यःपितराउपावतुरिति पुत्रहितार्थंयत्किंचित्तत्रतंपितरौमातापितरौपितृपितामहौवाउपेत्यस्वीकृत्यअवतुःव्रतेसम्यक्परिपालयामासतुः तंदेवतस्यपुत्रस्यश्रेयःसाधनमित्यर्थः एवंसत्यबादिनांतीर्थानियज्ञादयः तत्रमार्गेणसूर्याद्यन्यतमोपास्तिः केवलवैदिकानांचेतिदेवताभावप्राप्तिसाधनानीतिमंत्रद्वयतात्पर्यसिद्धं तस्मादस्मदादिभिरल्पैरदृष्टमूलमदृष्टमूलंवामनुष्यासादिसर्वज्ञप्रणीतंस्मृतिजातंवेदवद्वेदविद्वचनमितिन्यायेनागमयितव्यंपठनीयंव्याख्येयंचेतिसर्वमनवद्यं ॥ ७ ७ ७ ७ ७ ७ ७ ७ ७ ७ ७ ७ ७

महताशास्त्रस्यारंभेबऊविघ्नसंभावनयास्वोपास्यंवासुदेवंद्वादशाक्षरेणप्रणम्य यस्यदेवेपराभक्तिर्यथादेवेतथागुरौ तस्यैतेकथिताह्यर्थाःप्रकाशंतेमहात्मनइत्यूक्तेरीश्वरवत्सरगुरुंपितामहंपरमगुरूंवसिष्ठमरीच्यादीन्प्रजापतींश्चप्रणम्यअहंमनुरभवंसूर्यश्चेत्यादिनावामदेवइवस्वकीयंब्रह्मभावंश्रयमात्माब्रह्मेतिशास्त्रदृढमनुसंदधानःप्रत्यगात्मानमेवनमस्करोति ॐनमःकृष्णद्वैपायनायेति ततोविघ्न

ॐनमोभगवतेवासुदेवाय ॐनमःपितामहाय ॐनमःप्रजापतिभ्यः ॐनमःकृष्णद्वैपायनाय ॐनमःसर्वविघ्नविनायकेभ्यः लोमहर्षणपुत्रउग्रश्रवाः ७ ७

विनायकान्नमस्कृत्यसुखासीनानितिभारतारंभश्लोकेपेक्षितंपूरयतिगद्येन लोमहर्षणपुत्रइति लोमानिहर्षयंतेकेनोत्तृणायःस्वभाषितैः कर्मणाप्रथितस्तेनलोमहर्षणसंज्ञयेतिकौर्येनिरुक्तार्थनाम्नःपुत्रःउग्रश्रवाः उग्रस्यनृसिंहतापनीयोपनिषत्प्रतिपाद्यस्यश्रवःश्रवणंयस्यसः अधिगतोपनिषद्रहस्यइत्यर्थः सौतिःसूतजातेरुत्पत्तिरुक्तावायुपुराणे वैन्यस्यहिपृथोर्यज्ञेवर्तमानेमहात्मनः सूत्यायामभवत्सूतःप्रथमंवर्णवैकृतं ऐंद्रेणहविषातत्रहविःपक्वंबृहस्पतेः जुह्वांवेद्यांदेवेनततःसूतोव्यजायत शिष्यहव्येनसंपृक्त

मामिभूतेगुरोर्हविः अथरोत्तरचोरणजशेतदूर्णवैरुतमिति वर्णवैरुतमितिब्राह्मण्यांक्षत्रियात्सूतइतियाज्ञवल्क्योक्तंविलोमजत्वं तस्यसूतस्याप
त्यंसौतिःपौराणिकःपुराणेकृतश्रमः नैमिषारण्ये एवंकृत्वाततोदेवोमुनिगौरमुखंतदा उवाचनिमिषेणेदंनिहतंदानवंबलं अरण्येस्मिंस्त
तस्त्वितनैमिषारण्यसंज्ञितमितिउक्तरूपे नैमिषेतिपाठेतुबायवीये एतन्मनोमयंचक्रंमयासृष्टंविसृज्यते यत्रास्यशीर्यतेनेमिःसदेशस्तप
सःशुभः इत्युक्त्वासूर्यसंकाशंचक्रंसृष्ट्वामनोमयं प्रणिपत्यमहादेवंविससर्जपितामहः तेपिहृष्टतराविप्राःप्रणम्यजगतांप्रभुं प्रययुस्त
स्यचक्रस्ययत्रनेमिर्व्यशीर्यत तदनंतेनविख्यातंनैमिषंमुनिपूजितमितितन्निर्वचनंद्रष्टव्यं शौनकस्य शौनःसर्वविवेकदर्शितिलीलावत्यां

सौतिःपौराणिकोनैमिषारण्येशौनकस्यकुलपतेर्द्वादशवार्षिकेसत्रे १

शौनएवशौनकः तस्यकुलपतेः एकोदशसहस्राणियोन्नदानादिनाभरेत् सर्वेकुलपतिरिक्तलक्षणस्य येयजमानास्तएवऋत्विजोयस्मिन्ब
ह्वृक्तैर्ऋक्तोससत्रसत्रः यथोक्तं बह्वृग्भ्योदीयतेयत्रतत्र्यंतिप्राणिनोवह्व ऋत्वोरोबहवोयत्रतत्सत्रमभिधीयतइति १ सुखासी
नानिति कर्मछिद्रेषुसुखंसुरूपानंदविचारयितुमासीनान् अभ्यगच्छत् आभिमुख्येनस्वयमेवतेषांपुरःकथांवक्तुकौतूहलिकृतयागतवान्
नानाहृतोध्वरंगछेदन्यत्रतुकृतहलादित्यर्थः तीक्ष्णैः संशितव्रतान्सम्यक्कृशितंतीक्ष्णंखड्गधारावदनास्कंदनीयंव्रतंब्रह्मचर्यादिकंयेषांतान् २ राम ४
नैमिषारण्यवासिनोआश्रमंअनुप्राप्तंतंतपस्विनःपरिवव्रुरितिसंबंधः अनुप्राप्तइतिपाठेतुउत्तरार्द्धंतमित्यध्याहार्यं ३ तपोधनानांत

योदृद्धिरेवप्रख्याऽतस्तान्ततपोदृद्धिंअपृच्छत्पृष्टेर्द्धिकर्मकत्वात् तपोदृद्धानितिपाठेतपोऽपृच्छदित्यन्वयः ४ निर्दिष्टंदृढउपविश्यतामितिद
र्शितं ५ प्रस्तावयन्उपोद्घातयन् प्राप्तवयाइतिपाठेदृढइत्यर्थः ६ उपोद्घातमेवाह कुतइति विहृतःनीतः ७ एवमिति सम्यक्कृताद्

सुखासीनानभ्यगच्छद्ब्रह्मर्षीन्संशितव्रतान् विनयावनतोभूत्वाकदाचित्सूतनंदनः २ तमाश्रमम
नुप्राप्तंनैमिषारण्यवासिनां चित्रःश्रोतुंकथास्तत्रपरिवव्रुस्तपस्विनः ३ अभिवाद्यमुनींस्तान्सर्वानेव
कृतांजलिः अपृच्छत्सतपोवृद्धिंसद्भिश्चैवाभिपूजितः ४ अथतेषूपविष्टेषु सर्वेष्वेवतपस्विषु नि
र्दिष्टमासनंभेजेविनयाल्लोमहर्षणिः ५ सुखासीनंततस्तंतु विश्रांतमुपलक्ष्यव अथापृच्छदृषिस्तत्र
कश्चित्सस्तावयन्कथाः ६ कुतआगम्यतेसौतेक्वचायंविहृतस्त्वया कालःकमलपत्राक्ष शंसैतत्पृच्छतो
मम ७ एवंदृष्टोऽब्रवीत्सम्यग्यथावल्लोमहर्षणिः वाक्यंवचनसंपन्नस्तेषांचचरिताश्रयं ८ तस्मि
न्सदसिविस्तीर्णेमुनीनांभावितात्मनां सौतिरुवाच जनमेजयस्यराजर्षेःसर्पसत्रेमहात्मनः ९

तःशुद्धं यथावत्सार्थतःशुद्धं वचनसंपन्नःशब्दप्रयोगकौशलयुक्तः तेषांचचरिताश्रयं तेषांमुनीनांचात्सन्येषांराजादीनांचसंबंधीनिया
निचरितानितेषामाश्रयभूतंवचनं ८ भावितात्मनांविशोधितचित्तानां सौतिरुवाच जनमेजयस्यराजर्षेरित्यक्षराधिक्यमार्षं यतु जन्मे

नेवातिशुद्धेनशत्रूनजितवान्यतः एजृकंपनधातोर्हिजन्मेजयइतिश्रुतइतिनिरुच्यचतुरसरंनामेत्याऽऽस्तस्मिन्मूलं जनमेजयः परिक्षितइतिश्रोतास्
रसंख्याविरोधात् जन्मशब्दस्यानुपसर्गत्वाच्चेडि परूपंदुर्लभंच युक्तंतुजनशब्दपूर्वात् एजृमेजश्चाऽऽदीक्षायामितिदीक्ष्यर्थात्प्यंतादेजेःखशिति ख
शिमुमागमेजन्मेजयइति ९ पार्थिवेंद्रस्यसमीपेरुलद्वैपायनोक्ताःवेशंपायनोक्ताः वैशंपायनेनकथिताश्चेतिसंबंधः १० विशंपजां

समीपपार्थिवेंद्रस्यसम्यक्पारिक्षितस्यच रुलद्वैपायनोक्ताःसत्पुण्याविविधाःकथाः १० कथिताश्चापिविधिव
द्यावैशंपायनेनवै॰ श्रुत्वाहेताविचित्रार्थामहाभारतसंश्रिताः ११ बहूनिसंपरिक्रम्यतीर्थान्यायतनानिच स
मेतपंचकंनामपुण्यद्विजनिषेवितं १२ गतवानस्मितंदेशंयुद्धंयत्राभवत्पुरा कुरूणांपांडवानांचसर्वेषांचमहीक्षि
तां १३ दिदृक्षुरागतस्तस्मात्समीपंभवतामिह आयुष्मतःसर्वएवब्रह्मक्षत्राहिमेमताः १४ अस्मिन्यज्ञेमहा
भागाःसूर्यपावकवर्चसः कृताभिषेकाःशुचयःकृतजप्याऽऽहुताग्नयः भवंतआसनेस्वस्थाब्रवीमिकिमहंद्विजाः १५

पातीतिविशंपोजनमेजयः तस्यअयनंगुरुत्वेनआश्रयभूतोविशंपायनःस्वार्थेतद्धितः यद्वाविरिवविःजीवः पक्षिवद्देहांतरसंक्रमणात् शंपः
सुखस्यपालकईशःतयोरयनमधिष्ठानंयुद्धंब्रह्मतदधीतेतद्वेदेतिवावैशंपायनः तांश्चलांतदेशंगतवानस्मीतिसंबंधः महाभारतं चकार
एकोवेदोमहाभारतमेकतः महर्षिभिःसमागत्यतुलामारोपितंपुरा महत्वाद्गौरवत्वाच्चमहाभारतमुच्यतेऽत्रुक्तलक्षणसंश्रिताःसम्यक्श्रिताः

सर्ववेदार्थगर्भाइत्यर्थः तःपूर्वमहत्त्वमित्यन्वयस्मृतोमत्वर्थीयःतत्पत्ययोवाऽऽलुकात्भारतशब्दादपीतिज्ञेयं ११ तीर्थानिजलप्राधान्यात्पुष्करादीनि
आयतनानि स्थलप्राधान्यात्नैमिषादीनि १२ १३ १४ हतेति आसनेस्वस्थाःभवंतःभवंत्वितिशेषः आसतेरितिपाठेत्वास्थ्यंदृष्टमिति क
थांप्रस्तोतुमित्यर्थः अहंचपुराणादिसन्यतमंकिंब्रवीमीत्याज्ञापयंतीतिशेषः १५ पुराणेति सर्गश्चप्रतिसर्गश्चवंशोमन्वंतराणिच वंशानुचरितंचेति
पुराणंपंचलक्षणमितिस्मृत्यक्तंपुराणंपुराप्यनवंवर्णपदानुपूर्वीरिवंशेपित्रतिकल्पंतदर्थानांसर्गादीनांसमानरूपत्वात् सूर्याचंद्रमसौधातायथापूर्वमकल्प

पुराणसंहिताःपुण्याःकथाधर्मार्थसंहिताः इतिवृत्तंनरेंद्राणामृषीणांचमहात्मनां १६ ऋषय
ऊचुः द्वैपायनेनयत्प्रोक्तंपुराणंपरमर्षिणा स्रैर्ब्रह्मर्षिभिश्चैवश्रुत्वायदभिपूजितं १७ त
स्याख्यानवरिष्ठस्यविचित्रपदपर्वणः सूक्ष्मार्थन्याययुक्तस्यवेदार्थैर्भूषितस्यच १८ ७

ल्पयदितिश्रुतेःपुराणस्यसंहिताः धर्माश्रिताःकथाःदानमोक्षधर्माद्याः अर्थाश्रिताःराजधर्माद्याः नरेंद्राणांनलरामादीनांइतिवृत्तंआचारप्रकारं ऋषीणां
भृग्वादीनां वात्सप्रतिव्रतादीनां १६ स्रैरितिश्रुतंसत्सलोकेइतिशेषः १७ विचित्राणिस्वरूपतोर्थतश्च रम्याणिपदानिवाक्यादे
रुपलक्षणं पर्वाणिपौष्यपौत्रोमादीनिवाक्यंतस्य सूक्ष्माअतर्क्यार्थाआत्मतत्वादयः अचिंत्याःखलुयेभावानतांस्तर्केणयोजयेत् नाप्रतिष्ठिततर्केणग
भीरार्थस्यनिश्चयः नैषातर्केणमतिरापनेयेतिश्रुतिस्मृतिभ्यां न्यायःतत्वतीत्यनुकूलायुक्तिः वेदार्थैर्वेदतात्पर्यविषयभूतैरर्थैश्चभूषितस्यच १८ ७

संस्कारोपगतोपदादिव्युत्पत्तिमतीं श्राव्यीवाचं श्राव्यीमेभारतीभाषेत्यमरः नानाशास्त्ररूपबृंहितोऽर्थोपबृंहणशास्त्रांतराविरुद्धोमित्यर्थः १९ राज्ञोऽग्रेऽतिशेषः २० वेदैश्चतुर्भिः संयुक्तोचतुर्वेदार्थवतीं संमितामितिपाठेतुत्यामित्यर्थः पुण्यांश्रेयोवर्द्धिनीं पापापहांचित्तशोधिकां २१ मंगलाचरणपूर्वकंमुनिभिःप्रार्थितमर्थंवक्तुंप्रतिजानीते आद्यमित्यादिचतुर्भिः हरिंनमस्कृत्यमहर्षेर्मतंप्रवक्ष्यामीतितृतीयचतुर्थयोरन्वयः अभूवीजांकुरतरुस्कंधोपमाःपंचईश्वरपुरुषाः शुद्धशबलसूत्रविराड्विष्वक्सेनाः निरुपाधिमायोपाधिमायाकार्यापंचीकृतमहाभूतोपाधिपंचीकृतमहाभूतोपाधिपुरुषाकारमूर्त्युपाधिविशिष्टचैतन्यरूपाः तत्रत्रीनत्रैदृशतिनमस्कार्यतेन आद्यंपुरुषं निरुपाधिचैतन्यं ईशानं मायिनंतुमहेश्वरमितिश्रुतिप्रसिद्धं पुरुहूतंयज्ञेपुरुभिः बहुभिर्होतृभिःहूतेआहूतेपुरुभिःसामगैःस्तुते अध्वर्युभिरिष्टेचेत्यपिदृश्यं तथ दिदमाडारमुंयजामुंयजेत्येतस्यैवसाविष्टिरितिहिरण्यगर्भरत्येसूत्रेसर्वयष्टव्यदेवतात्मतयश्रुतेः यदेनमृग्भिःशंसतियजुर्भिर्यजतिसामभिःस्तुवंतीतिश्रुतेश्च पुरुहूपुरु

भारतस्येतिहासस्यपुण्यांग्रंथार्थसंयुतां संस्कारोपगतांश्राव्यीनानाशास्त्रोपबृंहितां १९ जनमेजयस्ययोराज्ञोवैशंपायन
उक्तवान् यथावत्सऋषिस्तुष्टःसत्रेद्वैपायनाज्ञया २० वेदैश्चतुर्भिःसंयुक्तांव्यासस्याद्भुतकर्मणः संहितांश्रोतुमिष्टामःपुण्यां
पापभयापहां २१ सौतिरुवाच आद्यंपुरुषमीशानंपुरुहूतंपुरुष्टुतं ऋतमेकाक्षरंब्रह्मव्यक्ताव्यक्तंसनातनं २२ श्रीराम

भूयिष्टमित्यमरः एतदेवत्रयंसंयुक्तमेणविशिनष्टि व्यक्ताव्यक्तंसनातनमिति व्यक्तंसूत्रात्माहविर्भोक्तृफलप्रदात्वादियोगात् अव्यक्तंईशानःसृष्टिप्रलययोः सर्वेशयात्मकत्वात् सनातनंअखंडदंडायमानं एतेनतस्मादव्यक्तमुत्पन्नमितिस्मृतेश्चेतरयोरुत्पत्तिमत्वेनलयोदर्शितः ऋतंयथाभूतं यथास्फटिकेस्वतःशुद्धेहिंगु लाश्रयत्वेनरक्तंतत्तेनस्फटिकांशप्रमोषेपपरागंतत्तेनैवस्फटिकायामिंद्रनीलत्वंचाध्यस्यते तथाचैतन्येमायायोगात्ईशत्वं ईशेयविद्यायोगात्सूत्रत्वं सूत्रेपिअवि द्यादाढ्यात्विराट्त्वंचाध्यस्यते तत्रउत्तरोत्तरापेक्षयापूर्वपूर्वऋतंपरमत्रैवाद्यःपुरुषएव एकमितिमायाद्युपाधिकृतभेदनिरासः अक्षरंअशेःसरः व्यापकं तेन आकाशात्पृथिव्यादिरिवनात्मात्पृथक्उपाधेरपिसत्वमस्तीतिदर्शितं अतएवब्रह्मनिरवधिकबृहत्वात्देशतःकालतोवस्तुतश्चपरिछेदशून्यं २२ ७

चतुर्थंविराजमाह असच्चेति यत्सदसत्परंसदसत्योःकार्यकारणाख्योपरंअन्यत्सनातनाख्यंतदेववस्तुविश्वंविराट्रूपमित्यमित्यर्थः ब्रह्मैवेदंसर्वमि त्यादिश्रुतेः किंतूतंविश्वंसत्दृश्यमानत्वात् असच्चेनेहनानास्तिकिंचनेतितत्त्वज्ञानबाध्यत्वश्रुतेः नन्वाद्यंतयोरसत्मध्येचसत्घटादिकंदृष्टं नेत्याह असच्चेति रज्जूरगवत्प्रतिभासमानमपिकालत्रयेपिनास्तीत्यर्थः फलोपमंपंचमंविष्णुमाह परेति परेसृष्टात्मनः अवरेविराडादिघटांताः बहुत्वेअनंतशक्तित्वसूच नार्थंतेषामस्रष्टारं नन्वंडांतरुत्पन्नस्यकथंपरादिस्रष्टृत्वमताह पुराणमिति पुरापिनवं अनादिरेवसन्ब्रह्मांडांतश्चतुर्भुजेनरूपेणाविर्भूतोनंतशक्तिःप रिणतबीजगर्भफलमंकुरादीनामिवपरावराणांस्रष्टाभवतीत्यर्थः अतएवपरमव्ययंअत्यंतंव्ययशून्यं संसारस्यानेत्यात्मकारणीभूतस्यतस्यव्ययोनयुज्यतइत्य

असच्चसदसच्चैवयद्विश्वंसदसत्परं परावराणांस्रष्टारंपुराणंपरमव्ययं २३

र्थः ननुसोयमात्माचतुष्पादित्यादिनानिरुपाधितुर्यप्रतिपत्तेयेपरमात्मनस्त्रीण्येवसोपाधिकानिरूपाणिविश्वतैजसप्राज्ञसंज्ञानिमांडूक्यादिषुश्रूयंतेनतुच तुर्थमितिचेत् सत्यं तथापियएषोंतरादित्येहिरण्मयःपुरुषोदृश्यतेहिरण्यश्मश्रुर्हिरण्यकेशाः आरण्यन्यग्रोधौतृतीयस्यामितोदिवीत्यादि प्रभुविमितं हिरण्मयंवेश्मेतिछांदोग्येपुरुषाकृतेर्ब्रह्मणस्तल्लोकादेश्चश्रवणात् कौषीतकिब्राह्मणेचपर्यंकस्थस्यब्रह्मणस्तेनसहसंवादादेश्चश्रवणात्तदप्यस्तीतिग म्यते आरण्यकपिंगधमारुनंवेशौधौम्यवाक्येमहामेरुर्महाभागेत्यादिनामेरुदृष्टेब्रह्मलोकादन्यंविष्णुलोकंप्राच्यांनारायणस्यानंमेरावितिविराजनेद्र त्यादिनास्थानमेतन्महाभागध्रुवमक्षयमव्ययमित्यंतेनग्रंथेनोक्तविशेषणसामर्थ्यात् तत्रैववनत्यागानामनावृत्तिःस्मृता तत्रगत्वापुनर्नेमंलोकमायांति

भोरिति स्तनोतेरभ्यस्याद्वृत्तिर्गृहीतासूक्ता आब्रह्मभुवनाल्लोकाःपुनरावर्त्तिनोर्जुनेति स्मोवेवब्रह्मविल्लोकावभिप्रेत्यचोदितंचतुर्थेकार्यवादरिरित्यत्र ओ
दोग्धिहिरण्यर्चिरादिमार्गप्रकृत्यश्रूयते सएनान्ब्रह्मगमयतीत्यत्रामानःपुरुषःउपासकान्कार्यब्रह्मप्रापयत्यतःविद्यारब्धंपरमिति प्राणोब्रह्मकंब्रह्मखं
ब्रह्मेतिप्रत्ययद्वावकंतदेवखंयदेवखंतदेवकमितिकखयोरभेदमुक्त्वाप्राणंचहास्मैतदाकाशोवोचुरितिप्राणाकाशाख्ययोःकार्यकारणब्रह्मणोरुपास्यत्वे
नोपसंहारात्संशयः तत्रपरस्मिन्ब्रह्मणिननस्यप्राणउक्रामत्येवसमवनीयंतइतिश्रुतिप्रसिद्धंपारमार्थिकंगत्यभावमभिप्रेत्यकार्यब्रह्मैवगतिप्रा
प्यमितिपूर्वःपक्षःपरमितिसिद्धांतः अस्मिन्पक्षेश्रुतिसूत्रयोःस्वारस्यंकर्तव्यंईक्षतिकर्माधिकरणे भाष्येपिहिएवंविधौपूर्वोत्तरपक्षौसर्वत्र द
श्यंते यत्तूक्तंपरमेश्वरेहिरण्यश्मश्रुत्वादिरूपश्रवणंनोपपद्यतइति तत्रब्रूमःस्यात्परमेश्वरस्यापिइच्छावशात्मायामयंरूपंसाधकानुग्रहार्थमित्यादि
ना तद्दिहापिज्ञेयं तत्रपूर्वपक्षेफलंइमेमानवमावर्त्तंनावर्त्तंनइयंतेइममितिविशेषणान्मानवांतरेश्रावृत्तिरिति सिद्धांतेतुनचपुनरावर्त्तंनइतिश्रुत्यंत
रात् यतोवाइमानिभूतानिजायंतइतिवदिदंशब्दउपदर्शनार्थइत्यनावृत्तिरिति कथंतर्हिभाष्येसूत्रक्रममुल्लंघ्यपरंगतिप्राप्यमितिप्रापण्यकार्यमेव
गतिप्राप्यमितिसिद्धांतितं श्रृणु नोव्योमापरोयदितिपरव्योमाख्यस्याप्याकाशस्यसर्वजगत्कारणस्यापिसद्भेः प्राक्निषेधश्रवणात्ततस्माद्व्य
क्तमुत्पन्नमितितदुत्पत्तिश्रुतेःहिरण्यश्मश्रुत्वादिमतोपिकारणब्रह्मणःशुद्धापेक्षयाकार्यत्वेविवक्षितत्वात्तद्विषयत्वंगतिश्रुतीनांवर्णितं परशब्देन
चशुद्धंविवक्षितत्वात्तत्रगत्ययोगश्चदर्शितइति नचहिरण्यश्मश्रुत्वादिश्रवणंकार्यब्रह्मविषयमेवेतिवाच्यं श्रेतस्तद्धर्मोपदेशात्दहरउत्तरेभ्यइत्या
दिन्यायेनतस्यजगत्कारणसिद्धेः इयमेवर्गग्निःसामवागेवार्कप्राणःसामेत्यादिनाऋक्सामात्मकत्वेननिरूपितस्यकृत्स्नस्याधिदैविकाध्यात्मिकस्यप्र
पंचस्यतस्यैकसामगेश्लावतितदंगुलिपर्वमात्रत्वोक्तेश्च तस्मात्तत्रास्त्वित्यन्यायेनतदधीनंजगद्यापारवर्जंइतरेषामुपासनासिद्धानांहिरण्यग

र्भादीनामैश्वर्ययेनसहतेषांभोगसाम्यंतथैतांसर्वाणिभूतान्यवंत्येवंहैवंविदंसर्वाणिभूतान्यवंतीतिलिंगाद्गम्यते यस्यसभूमिंसर्वतोवृत्वात्यतिष्ठद्दशांगुलमि
तिघटादिभ्योमृद्दशवृद्ध्याद्यैर्जालादैर्जालिकस्यैवचविकारवर्जनन्नदवर्त्तिचरूपंस्थितिश्चश्रूयते यल्लोकंपात्रानामनावृत्तिस्तच्छ्रुत्यभूतचतुर्थकेणसहमु
क्तिरधिकारिकाणामभुक्तविद्याफलानांतल्लोकगतानामपियावदधिकारंकल्पांतरेप्यवस्थितिश्चेतिश्रूयतेतस्यविषयादिकंसर्वशास्त्रसामान्याद्दर्शुपे
यंजयमेवभगवत्पादीयेवेदांतसौरवनदृष्टांतेननस्थूलसूक्ष्मकारणोपाधिभेदेनत्रिविधेसमष्टिव्यष्टीप्रतिपाद्यसमष्टिवनदृष्टांतेनप्रतिपादितः किं
चशुद्धब्रह्मणिप्रणिधीयमानेचित्तस्थूलसूक्ष्मकर्मात्मकंविदात्मनिविलापयेदितिपंचीकरणोक्तक्रमेणस्वाभाविकपरिच्छेदाभिमानंत्यक्त्वाऽहमेवेदं
सर्वोस्मीतिमन्यतेसोस्यपरमोलोकइतिसात्त्वीयसार्वात्म्याभिमानयुक्तंव्यक्तभावनामंतरेणसहसाकर्तुमशक्यं अव्यक्ताहिगतिर्दुःखंदेहवद्भिरवा
प्यतइत्युक्तेः देहवद्भिर्देहाभिमानवद्भिः तस्माद्भावनामयंप्रणिधानमयंचेतिद्विविधमपिध्यानंशुद्धंवस्तुप्रतिलोभावश्यकं तत्राद्यंनष्टवनितावदसन्नि
हितविषयंपुरुषव्यापारतंत्रं तेनवशीकृतंचित्तंक्रमशोमूर्त्याकारतःप्रत्याव्याच्यक्रमात्कालबलेनोभूलाविराडादीकारणेब्रह्मणिचित्तंप्रणिदध्यात्तत्र
यमेवध्यानक्रमःश्रीमद्भगवतादिसर्वपुराणेषूक्तःप्रणिधानंचवस्तुतत्वविषयंपूर्वोक्तस्फटिकदृष्टांतेनआत्मन्यध्यस्तस्यविराडादित्रयस्यरज्जुस
र्पस्येवचित्तस्थितिकरणेनअधिष्ठानशुद्धवस्तुदर्शनेनप्रविलापनकरणंतच्चदर्शनंदग्धेधनानलवत्स्वयमुपशांतेचेत्कृष्णस्वरूपाकाचिदानंदा
वस्थाऽभिर्भवति साचश्रूयते यथाग्निरिंधनोवह्निःस्वयोनावुपशाम्यति तत्रमोक्ष्योदोयद्यपिप्रणिधानगोचरमेवरूपत्रयमुक्तंतथापिमंदाधिकारिणांभो
गोचरमपिचतुर्थंसोपाधिकैश्वरंरूपंश्रुत्युक्तक्रमप्रत्याख्येयं नचस्थानित्यत्वेनतल्लोकादिकमपिनित्यंवाच्यं तथाचसृष्टेःप्राक्सदेवसोम्येदमग्रआसीदेकमेवा
द्वितीयमितिनिर्विधभेदशून्यसन्मात्रसद्भावावधारणंविरुध्येतेतिचेन्न व्यवहारपरमार्थदृष्टिभ्यामुभयोपपत्तेः तथाहि नरूपमस्येहतथोपलभ्यतेनो

नोनचादिर्नचसंप्रतिष्ठा अश्वत्थमेनंसुविरूढमूलमसंगशस्त्रेणदृढेनछित्वा अस्यार्थः नरूपमस्यनोतोस्यछित्वेनमितिवेश्वरः इंद्रजालोपमत्वेनभवाश्वत्थं न्यरूपयत् १ सम्यग्दृशावीक्ष्यमाणंरूपंनास्योपलभ्यते एतत्प्रयोक्तुर्नित्यत्वादयमाद्येनवर्जितः २ रज्जुसर्पसमस्यास्यतुच्छज्ञानोद्भवत्वतः प्रतिष्टाख्य लयस्त्वनेनास्तिकुंभस्यमृद्यथा ३ अस्यैवेदंइजालस्यउपादानकारणं अज्ञानंतदुपाश्रित्यब्रह्मकारणमुच्यते ४ इत्येवंवार्त्तिकाचार्यैरुपचारात्परात्मनः उक्तोपादानतातस्मादप्रतिष्ठोभवद्रुमः ५ दुःखमूलंसंसारःसंगमात्रेणदुःखदः तमसंगास्त्रिनाछित्वाप्रयाहिपरमंपदं ६ नित्यंबद्धंदृढंत्वेदंइजालंसु दृढंशांत्विदं कालत्रयेपिनास्तीतिन्यायमात्रापियोजयेत् ७ प्रवाहनित्यंजगदित्याऽऽमंसांसकाःस्फुटं व्यवहारेमाहनयोत्यस्माकमपिसंमतः ८ नकार्यत्वान्नित्योयंनंदनंदनविग्रहः उपचाराद्धिकार्यत्वंतैर्पोराणिकाजगुः ९ देवानांकार्यसिद्ध्यर्थमाविर्भवतिसायदा उत्पन्नेतिसदालोकैस्तानित्याप्यभिधीय ते १० दुर्गाविनायकोविष्णुर्भवोभानुरितीहहि नामरूपांतरायैस्यस्फुटंमःपार्थसारथेः ११ वेदांतेष्वपिनित्यत्वेबादीनांव्यावहारिकं सिद्धवत्कृत्यदृष्टांतेकीर्त्यतेहिपरिस्फुटं १२ तथाह्याकाशवत्सर्वगतश्चनित्यः इत्याकाशात्मनोर्दृष्टांतदार्ष्टांतिकयोः सर्वगतत्वनित्यत्वेसंगछते अन्यथाद्वयोरपिसत्यत्वेसर्व गतत्वस्यैरासंभवत्यात्तातावत् ततश्चयथाऽस्मदादिरुन्निद्रोलेसयदास्थितंतदेवंवाक्यैर्नामभिः सहायेतिवक्तुः सर्वैरूपैः सहायेतीत्यादिनाश्रूयमाणे पिसर्वनामरूपप्रलयेइतरेषांव्यवहारोनविछिद्यते एवंब्रह्मप्रलयकालेपिवैकुंठवासिनामिति सदेवसोम्येत्यादिकमपि आदावंतेचयन्नास्तिवर्त्तमा नेपितत्तथेतिन्यायेननेहनानास्तिकिंचनेतिश्रूयमाणस्यव्यवहारकालेपिप्रपंचासत्वस्यप्रदर्शनार्थं नतुकादाचित्कस्यतदसत्वस्यज्ञापनार्थं नासतोवि द्यतेभावइत्यसदुत्पत्तिनिषेधात् नोतोनचादिरितिगीताविरोधाच्च तस्मादखंडदंडायमानेंद्रजालतुल्यस्यजगतोदर्शनादर्शनेएवोदयलयावित्यभिप्रायेण सृष्टिश्रुतयइत्याकाशवद्व्यावहारिकंविष्णुमूर्त्यादेरपिनित्यत्वमितिसिद्धं परमार्थतस्तुननिर्विशेषवस्तुमात्रादन्यत्कालत्रयेपत्तीतिदिक् रज्वज्ञानात्स

र्पभीतिपातस्तमिवकर्मात् आत्माज्ञानादहंसंगक्रियादेहसमुत्थितं १ घनवल्लीयतेस्फोटैर्वासनामात्रदेहकृः बोधेसहन्यतेवैवपुनःपुनरहंभ्रमः २ अहं तद्वासनाद्वारानाज्ञानेसतिशाम्यति संगक्रियादेहवर्गोनष्टेहमिनश्यति ३ रज्ज्वज्ञानाद्यथासंगोनतुकर्मेद्भवंपुंसः ४ यावत्कर्मवपुस्तावद्यावद्देहस्थितिष्ठति तावत्कर्मीहंभ्रमश्चवर्त्तेतेदग्धवस्त्रवत् ५ तत्रैवंसतिकर्मोत्थंकर्मनाशात्प्रणश्यति अकर्मजंतुबोधे नबाध्यतेनतुनश्यति ६ एवंश्रीकृष्णदेहोयमकर्मोत्थोननश्यतिबोधेनबाध्यतेवैवस्वप्नदृष्टइवेश्वरः ७ अन्योन्यबाधकौजाग्रत्स्वप्नावात्मनिकल्पितौ नोसद्येतेननश्येतेरज्वांसर्पस्रजाविव ८ आत्मैवहीश्वरोस्माकंधीदर्पणदृश्यकृत्तः धीनाशएवतद्बाधःकार्यत्वाधीश्चनश्यति ९ नन्वैश्वर्यमकार्यत्वं ननश्येत्त्यगात्मनः बाढंबाधस्तुतस्यस्यान्मायाबाधेनसर्वथा १० अत्रोक्तंवार्त्तिकसारे ब्रह्मलादेवजीवस्यभ्रातजीवत्ववारणात् वशित्वाद्याब्रह्मध र्माःशिष्यंतेसोयमीश्वरः ११ निवृत्तत्वाज्जीवधर्माभासेनैवकस्यचित् अनिवृत्तार्ईशधर्माअकर्मोपादितत्वतः १२ भातितेतीश्वरस्यापिबुद्धानांचस्व बुद्धितः ईश्वरस्यततोधर्माःसंतुनत्विहविस्मयः १३ निष्कलत्वपाशधर्मैर्बुधर्माणांमायिकत्वतः ईशोनिर्धर्मकोबोध्योविमुक्त्यर्थंमुमुक्षुभिरिति १४ प्रपंचस्तुतत्रैवद्रष्टव्यः कस्यचिद्विदेहमुक्तादेः अयंचईश्वरोपमधर्मवत्त्वस्वबुद्धिभेदात्तुवर्णश्वलिपिभेदादाकारभेदेनविष्णुरितिसांवृतिचशा स्त्राद्रूयते एवंतल्लोकवैकुंठइतिकैलासइतिच एकंसंतंबहुधाकल्पयंति योदेवानांनामधाएकएवेत्यादिश्रुतिभ्यः तंयथायथोपासतेतथेतःप्रेत्य भवतीतिश्रुतेस्तद्भावनावतांतत्तारूप्यप्राप्तिःकीटभृंगन्यायेनभवतिनतुनदैक्यप्राप्तिरितिश्रुत्यादितंवेदांतकृतके केचित्पूर्वोक्तमनःप्रणिधाना त्मकध्यानसंप्रदायानभिज्ञाः एतल्लोकप्राप्तिरेवमुक्तिस्यमेवेश्वरोनसमस्याख्योन्यईश्वरोस्तीतिवदंति तेसर्वशास्त्रप्रसिद्धमुक्तौद्वैतादर्शनंबाध मानाःस्वाप्ययसंपत्त्योरित्यादिन्यायेननहिदृष्टेर्दृष्टेर्विपरिलोपोविद्यतेऽविनाशित्वान्नतुतद्द्वितीयमस्तितोन्यद्विभक्तंपश्येदितिश्रुतिकेव

ल्ययोरविशेषात् द्वैतादर्शनश्रवणेनचविरुध्यते अनयैवचश्रुत्याद्वितीयाभावादेवद्वैतादर्शनंनतुरज्जौसर्पादिनिवर्त्यत्वाद्वैतस्येंद्रजालतुल्यत्वंदर्शितं तेनविष्णुः सर्वोत्तमः शिवोजीवः शिवःसर्वोत्तमोविष्णुः जीवस्तूपासकानामाग्रहोविस्वायुत्कर्षप्रतिपादकस्यभागवतसंहितादीनामनार्षत्वात्करत्वादिवचनैर्दूषणंचशास्त्रमर्यादानवबोधमूलमेवच विकल्पोविशिष्टफलत्वादितिन्यायेनऐकात्म्यचिन्तावतारार्थंयस्यकस्यचिदाकारस्यालंबनीयत्वात् यत्तुशैवैर्वैष्णवपुराणेषुइतरनिंदास्मरणंतन्नहिनिंदानिंद्येनेदितुंप्रवर्त्ततेअपितुविधेयंस्तोतुमितिन्यायेनविधेयस्तुत्यर्थः यथा उद्यन्वैखलुवाऽऽदित्यस्त्रायतेनरश्मीन्संदधातीत्युपक्रम्यप्रातःप्रातरनृतंतेवदंतिपुरोदयात्सूर्यऽस्तमितेयेजुहोते दिवाकीर्त्यमादिमदिवाकीर्त्तयंतुःसूर्योज्योतिर्नऽस्तंज्योतिरेषामिति आदित्योवाअस्तंयन्नग्निमनुप्रविशतीतिश्रुतिमुपजीव्यउदितेसूर्येप्रातर्जुहुयात् यथाऽतियेयेप्रहुतायश्रुत्यावसथायः हार्यहरंतिताहगेवतादितिउदितानुदितहोमयोःप्रकरणेइतरनिंदाविधेयस्तुत्यर्थैवतद्वत् नतुतत्रनिंदार्थोतात्पर्यस्ति उभयस्यापिस्तोज्यत्वापत्तेः नहिविष्णुभजनंशिवभजनंवातदंगमूर्ध्वपुंड्रत्रिपुंड्रादिवासरापानादिवद्रागतः प्राप्तंयेननिंदार्थत्वादनुमितनिषेधशास्त्रबलादनर्थकरंस्यात् यद्वासत्यपिनिषेधेशास्त्रतःप्राप्तत्वात्प्रतिरात्रेषोडशिनंगृह्णातीतिविहितप्रतिषिद्धत्वात्षोडशिग्रहणाग्रहणवद्विकल्पःस्यात् विशिष्टफलत्वेनाविरोधेवासमुच्चीयतां नतुतद्विधायकशास्त्रप्रामाण्यमध्यवसातुंशक्यंइतरस्यापितथात्वापत्तेःसर्वपुराणोच्छेदप्रसंगःतस्मात्स्थालशुनकन्यायेनशिवविष्णुगोचरेनिंदास्तुतिसंकेतमेदमाश्रित्यकार्यकारणब्रह्मगोचरतयाव्याख्येये यथाहिकश्चित्कुतुकीमुग्धांभार्यांकोपयितुंदृष्ट्वाशुनकेस्थालनाम्नासंकेत्यगालयतिसाचमद्भ्रातरमयंगालयतीतिकुप्यति तद्वत्रीवैर्विष्णुशब्देनकार्यब्रह्मविक्षितंतद्भजनात्भावनातारतम्येणैश्वर्यतारतम्यवत्तयाहीनसंपदांपुंसांदुःखकरत्वानरकशब्देदितस्यब्रह्मलोकस्यप्राप्तिरिष्यते एवंपक्षांतरेपि तथाचव्याख्यातंमोक्षधर्मेषुजापकोपाख्याने अमूनियानिरूपाणिदेवानांपरमात्मनामित्यादिनातस्यस्तवनवरत्वेहंसर्वेनिरयंतीतादृत्यंतेनतमिमंपौराणंभाषाभेदमजानंतःपामराःशैववैष्णवा

यमदाः ब्रह्माणंकेशवंरुद्रंभेदभावेनमोहिताः पश्यंत्येकेनजानंतिपरंदेवंपृहतजनाइतितत्रैवस्मर्यमाणंशिवविष्णोर्भेददर्शनेदोषमुदाहृताः भेदस्फूर्तीश्चापश्यंतःमूलकारणमेवोत्पत्कार्यान्तरवत्तत्तद्रूपेणभासतइतिशास्त्रतत्वमजानंतः अन्यतररूपपरित्यहेणेतररूपंदंतःपरस्परकलहायमानाःस्वामिद्रोहान्नरकायैवसंज्ञेनइत्यलंप्रसक्तानुप्रसक्त्या तस्मादस्तिचतुर्थ्यात्मनःपंचभ्योतिरिक्तोविष्वाख्यःपंचमःपुरुषःसोयंश्रुतिपाद्यते परावराणांस्रष्टारमित्यादिना नन्वयंनंदनंदनोयदिपरावराणामुच्चनीचानांस्रष्टातर्हिवैषम्यनैर्घृण्यभागीस्यात् नचतत्तत्प्राणिकर्मापेक्षोवितानर्थानसृजतीतिवाच्यं कर्मणएवमुख्यत्वेनतस्याकिंचित्करत्वात् कर्मणश्चब्रह्मादिःसर्वोगोपसंहारवतोविनैवेश्वरानुग्रहंफलसाधनत्वादृष्टेः तस्माद्रुपासनार्थत्वेनकल्पनामात्रेनहिंस्यहादिकमितिचेत्सत्यं देवताधिकरणन्यायेनोपासनायामदोषत्वेचशास्त्रस्यपरमतात्पर्यवत्वेपितत्प्रतिपत्कपायतयाऽनंतस्येश्वरस्यअवांतरतात्पर्यविषयतयोगविधानामितिदेवतावियहादिविधानांसामान्यसिद्धं मानांतरविरोधात्तुनचवैषम्यादिदोषः दाशतय्यांनिरस्तत्वात् तथाहि नसस्रोदक्षोवरुणधृतिः सारुरामन्युर्भीदकोप्यचित्तिः अस्तिन्यायान्कनीयसउपरेस्वप्नश्वनेदनृतमयथोतेतिमंत्रे सःस्रोदक्षोनयेनमहद्यशस्यंकर्मकृतेनतत्सामर्थ्येनभवति किंतुहेवरुणपरमेश्वरसातयेवधृतिःततत्तदीयमेवाधिष्ठातृत्वंतवैवमहात्म्यंतदित्यर्थः नन्वन्यसामर्थ्येनऽन्यःकरोतीत्ययुक्तमितिचेन्नाह स्करेति यथासुरामन्युर्मन्युःक्रोधःविभीदकोविभीतकः तत्सुतःकलिः अचित्तिःभूतावेशचित्तायुद्रेकजन्माउन्मादः एतेअशक्तमपिपुरुषंवशीकृत्यमहाशक्तमाध्यमपिकदर्थंकर्मकारयंति तद्वदीश्वरोपिसर्वस्मिन्यशस्येकर्मणिजीवंप्रवर्त्तयतीत्यर्थः अयंभावः नहित्वदोरनभिषश्वनेशोशतऽतेः ईश्वरानुग्रहंविनानिमिषोपिस्वयंचलितुंनऽइशितिसर्वासर्वोपिसात्विकोराजसीतामसीवाशक्तिरीश्वरायत्तैव तथापियथासर्वरसप्रहृतेर्मधुरैकरसभासस्यजलस्यइक्षुरसातिशयेनमाधुर्यमितिन्यायेन जंबारमरावरमशोलभाविकंतदभिभूतंऔपाधिकमप्यूनंकृत्वंचचाभिन्यक्तं एवंसर्वजगत्प्रकृतेः सत्वैकस्वभावस्येश्वरस्यनंदनंदन

विग्रहेतिशयेनसत्वमभिव्यक्तं अतएवतस्मिन्निरतिशयंधर्मज्ञानवैराग्येश्वर्यादिकमस्ति कामक्रोधाभिमानिदेवताविग्रहेतुसत्वंतिरोभूतं श्रीपाधिकंलोभग्रह
त्यादिकंप्रमादमोहादिकंचाविर्भूतं तयाचयथागोधूमादिचूर्णैरक्षरसाद्यनुग्रहात्तत्तद्रसवद्भवति एवंजीवांतःकरणमपिरश्वरानुग्रहात्धर्मोपगंकामाद्यनु
ग्रहाल्लोभोपगंचभवति अतएवभगवद्गीतासूत्रे ईश्वरःसर्वभूतानांहृद्देशेऽर्जुनतिष्ठति भ्रामयन्सर्वभूतानियंत्रारूढानिमायया इति सर्वभूतांतर्यामिणंप्र
कृत्य तमेवशरणंगच्छसर्वभावेनभारत तत्प्रसादात्परांशांतिंस्थानंप्राप्स्यसिशाश्वतमितितदनुग्रहफलंशांत्यादिकमित्युक्तं तथा अथकेनप्रयुक्तोयंपा
पंचरतिपूरुषः अनिच्छन्नपिवार्ष्णेयबलादिवनियोजितइतिप्रश्नस्योत्तरं कामएषक्रोधएषरजोगुणसमुद्भवइत्यादिनाकामक्रोधलोभाएवपुरुषंपापेप्रवर्तयंतिनत्वीश्वर इ
तिउक्तं एवमेवासाधुकर्मकारयति ईश्वरप्रेरितोगच्छेत्स्वर्गंवास्वर्गमेववेत्यादिश्रुतिस्मृतिजातंतुपर्जन्यवदीश्वरस्यसाधारणकारणत्वमित्याह नचतावता
जलवत्सर्वांतर्यामिणोपिईश्वरस्ययुज्यतेअंकुरादिजननस्यकार्यत्वेनाकर्तृकत्वानुपपत्तेश्चतत्कर्तारंईश्वरःसिद्धएवास्ति कुतर्त्यसावित्यतआह अस्मिन्प्रा
याल्पनीयसउपादइतिउभावप्येकत्वादनुपाधिनारूपेणज्येष्ठोसौपाधिनाकनिष्ठोतथापुपाधिसुद्धातिशयादीश्वरोज्यायान्।जीवःकनीयानतस्यसंघाता
भिमानिनउपारेसमीपेअंतर्यामितयास्ति अतःप्रविष्टःशास्ताजनानांसर्वात्मेत्यादिश्रुत्यंतरप्रसिद्धैः केनलिंगेनतर्ह्यसौज्ञेयइत्यतआह स्वप्नश्चनेदृ
तस्यप्रयोतेति स्वप्नश्चनस्वप्नइवइदृएव अन्यतस्यमिथ्याभूतस्यैवअहंकारादिघटांतस्यप्रपंचस्यप्रयोतायुमिश्रणाभिश्रणयोःप्रकर्षेणभ्योभूयःसंयोजयि
ताविवियोजयिताच योदृष्टिसमसमयोर्दृष्टिंदृजालवत्आविर्भावयतितिरोभावयतिसभगवान्महामायावीसमस्तपाशसंछेदनकोमेराराधनीयइतिभावः १
ननुमूर्तस्यअंतर्यामिणःतस्यकथमाराधनंकर्तव्यमित्यतआह अरंदासोनमीक्षुषेकराण्यहेदेवायभूर्णयेनागाः अचेतयदचितोदेवोअर्योगृत्संराधेक
वितरोजनातीति नशब्दवदार्थः अहंमीक्षुषेभ्यसोधनस्यदृष्टिंकृतवतेस्वामिनेदासोनदासइवदेवायचतुर्भुजमूर्तयेअरंकराणिअलंकरवाणिप्रार्थनायांलो

दृ यथादासाःस्वामिनेस्वकुचंदनमुकुटादिनाऽलंकुर्वंतिएवमहंपार्थिवंनंदनंदनविग्रहंभूषयेयमित्यर्थः अनागाःनिषिद्धाचरणवर्जिताः ननुचेतनोत्यलंकि
यमाणःसद्यःफलंददाति किमचेतनायालंकरणेनेत्यतआह अचेतयदिति अर्यःमुक्तिमुक्तिकामैरभिगम्यःस्वामीदेवःप्रतिमादिरूपःअचितःचेतनारहि
तानूसर्वानूपिंडानूअचेतयत्चेतनायुक्तानकरोति अहिल्यावत्भूतनिर्देशश्छांदसः अयंभावः देहइवप्रतिमायामपितीव्रभावनावताचैतन्यंस्पष्टमुप
लभ्यते प्रसिद्धंचैतत्प्रतिमोन्मेषणंमंत्रशास्त्रे उपरव्यायतेचपुराणादौ तस्मात्प्रतिमायाश्चेतनाधिष्ठितत्वेनचेतनस्यचसर्वपुरुषार्थप्रवर्तकत्वेनततःफलसं
भावनास्तीति एवंपरमेश्वरेश्रीमाधवादिप्रतिमारूपेसर्वपुरुषार्थप्रदेसत्यपिकवितरोबुद्धिमत्तरोजनोगृत्संप्राणंप्राणोवैगृत्सइतिश्रुतेः प्राणवंतंजीवंरा
जादिरर्थेधनार्थंजनातिअनुसरतिनानाविधैःकाव्यैःस्तुवंप्रसीदति अहोदौर्भाग्यमस्यतिश्रुतिरुत्साढंमंदानाक्रोशति कवितमस्परमेश्वरमेवनंदनंद

मंगल्यंमंगलेविष्णुंवरेण्यमनघंशुचिं नमस्कृत्यहृषीकेशंचराचरगुरुंहरिं २४ ७ राम ७

नापरपर्यायेसमस्तपुरुषार्थकामःशरणीकुर्यादितिभावः तस्माद्युक्तमुक्तंपराचराणांस्रष्टारमिति २३ मंगल्यंमंगलावहं मंगलेस्वरूपेणैव एषतेवानंद
यतीति श्रानंदोब्रह्मेतिचश्रुतिभ्यो विष्णुंयज्ञात्मानंयज्ञोवैविष्णुरितिश्रुतेः वरेण्यंवरणीयंभोगमोक्षकांक्षिभिरवश्यमादरणीयं अनघंआगंतुक
दोषास्पर्शनं शुचिंस्वभावशुद्धं शिवमितिपाठेशिवमहैतंचतुर्थमन्यंनेतिश्रुतिप्रसिद्धं निर्गुणं हृषीकेशंहृषीकाणामिंद्रियाणामीशितारं चरा
चराणांगुरुंविद्याप्रदं अतस्त्वंहरिंसंसारहरणं २४ श्रीरामजयरामजयजयराम ७ ७ ७ ७

ईदृशं हरिनमस्कृत्य व्यासस्यमतं अथातो ब्रह्मजिज्ञासेत्यादिसूत्रैर्निर्णीतंयत् ब्रह्मादेतत्प्रकर्षेणनानोपाख्यानोपबृंहणेनवक्ष्यामि तत्रश्रद्धोत्पादनार्थंमहर्षेरित्यादिव्यास
विशेषणं ऋषीणांमंत्रदृष्टॄनींमहत् इतितन्मतस्यश्रौतत्वमुक्तं अद्भुतकर्मणइतिब्रह्मादेतप्रतिपत्तयेतनानाऽऽख्यानदृष्टांतप्रणयनेनविचित्रग्रंथकारित्व
मुक्तं २५ आचख्युरिति कवयःक्रांतदर्शिनः २६ त्रैकालिकामपिकवीनामेतदाख्यानेगुणमाह इदमिति ज्ञानंज्ञानसाधनंत्रयारूपंद्विजातिभिःस्त्रैवर्णिकैर्यद्वार्थं
त्रैकालिकामपिकवीनामेतदाख्यानेगुणमाह इदमिति ज्ञानंज्ञानसाधनंत्रयारूपंद्विजातिभिःस्त्रैवर्णिकैर्यद्वार्थंतेतदिदमितिहासरूपेण त्रिषुलोकेषुजातितउत्तम म
ध्यमाधमजनेषुप्रतिष्ठितज्ञानकरत्वेनेत्यर्थः २७ समयैःसंकेतैः समयाःशपथाचारकालसिद्धांतसंविदइत्यमरः दिव्यमानुषैःवैदिकलौकिकैःसंस्कृतप्राकृतैः
वातथात्यमृतमथनादौजलादिषुएतादृशप्रयोगोवेदनिघंटुप्रसिद्धोदृश्यते तथाजतुग्रहदोहपार्श्वचरादिषुकक्षघ्नादिशब्दाःश्लेष्मप्रसिद्धादृश्यंते छंदोदृष्टैः

महर्षेपूजितस्येहसर्वलोकेमहात्मनः प्रवक्ष्यामिमतंपुण्यंव्यासस्याद्भुतकर्मणः २५ आचख्युःकवयःकेचित्संप्रत्याचक्षतेपरे आख्यास्यंतितथैवान्य इतिहासमिमंभुवि २६ इदंतुत्रिषुलोकेषुमहज्ज्ञानंप्रतिष्ठितं विस्तरैश्चसमासैश्चधार्यतेयद्द्विजातिभिः २७ अलंकृतेशुभैःशब्दैःसमयैर्दिव्यमानुषैः
छंदोदृष्टैश्चविविधैरन्वितंविदुषांप्रियं २८ निष्प्रभेस्मिन्निरालोकेसर्वतस्तमसावृते बृहदंडमभूदेकंप्रजानांबीजमव्ययं २९ ७ ७

त्रिष्टुबादिछंदोगतैर्दृष्टवज्जातिभिर्दृष्टैः २८ निष्प्रभइति यत्प्रजानांबीजंजगदुपादानंएकंनिमित्तांतरानपेक्षंअव्ययंअपरिणामिकूटस्थवस्तुनबृहदंडब्रह्मा
डरूपंअभूत्तदात्मानंस्वमकुरुतसच्चयच्चाभवदित्यादिश्रुतिभ्योब्रह्मणएवसर्वभावावगमात् कदोऽहंमममृदित्याकांक्षायांऋषिःप्रजानांबीजनिष्प्रभत्वकरणभा
नविशेषज्ञानंरूपाद्याकारतद्धेतेसति प्रलयकालेबुद्धिबोद्धव्ययोरभावात् निरालोकेआलोक्यतेनेनेत्यालोकः सत्वंईश्वरोपाधिभूतंविक्षेपशक्तिमत्मायारू
प्यंतद्रहिते मायायाअप्यभावेकृतोऽयंतत्राह सर्वतस्तमसावृतइति मायायाआवरणशक्तिरूपात्तुच्छात्तमसएवस्वप्नप्रपंचवदंडमुत्पन्नमि
त्यर्थः तयावक्ष्यतिः नाऽयोमापरोदितिरुद्रैः प्रागव्याकृतात्प्रधानाख्यमायायाअपिसत्वंनिषिध्यतुच्छत्वमपिहितंयदासीत्तमसस्तन्महिनाऽजायतैकमिति तमोमात्रात्सृष्टिं

दर्शयति २९

युगस्यब्रह्मकल्पस्यआदौजातेसनातनिमित्तंचतुर्विधभूतग्रामोपादानंयस्मिन्नंडेब्रह्मप्रविष्टमितिशेषः तत्सृष्ट्वातदेवानुप्रविशादितिश्रुतेः किंतत् सत्यं
विकारत्वहानं वाचारंभणविकारइति विकारस्यान्नतत्वश्रुतेः किंजडंप्रकृतिरूपं न ज्योतिःविद्रूपं सनातनंसततैकरूपं ३० अद्भुतंप्रत्यगात्मत्वेपिदुर्ज्ञे
यत्वात् अचिंत्यंवाग्मनसातीतत्वात् सर्वत्रदेशेकालेवस्तुनिचसमतांसाम्यंऐक्यमितियावत्गतंप्राप्तं अव्यक्तंअव्याकृतेकारणंहेतुः सूक्ष्मंबाह्येंद्रियाविष
यत्वात् सदसदात्मकं तुच्छानुच्छव्याकृतस्वरूपंअनिर्वचनीयमित्यर्थः ३१ यस्मादंडात् पितामहःसवैशरीरीप्रथमः हिरण्यगर्भः समवर्त्ततायंरत्यादि

युगस्यादौनिमित्तंतन्महद्ब्रह्मप्रचक्षते यस्मिन्नंडेश्रूयतेसत्यंज्योतिर्ब्रह्मसनातनं ३० अद्भुतंचाप्यचिंत्यंचसर्वत्रसमतांगतं अव्यक्तंकारणंसूक्ष्मंयत्तत्सदसदात्मकं ३१ यस्मात्पितामहोजज्ञेप्रभुरेकः प्रजापतिः ब्रह्मासुरगुरुः स्थाणुर्मनुःकःपरमेष्ठ्यथ ३२ प्राचेतसस्तथादक्षो
दक्षपुत्राश्चसप्तवै ततःप्रजानांपतयःप्रभवन्त्येकविंशतिः ३३ पुरुषश्चाप्रमेयात्मायंसर्वऋषयोविदुः विश्वेदेवास्तथादित्यावसवोथाश्विनावपि ३४

स्थानिप्रसिद्धः अस्यरजःसत्वतमोगुणप्रधानानित्रीणिरूपाण्याह ब्रह्मा सुरगुरुर्विष्णुः स्थाणुरुद्रः ब्रह्मणोविभूतीःसृष्टिकर्मप्रधानाआह मनुरि
त्यादिना ३२ दक्षपुत्राःसप्त क्रोधस्तमोदमश्चैवविकीर्तोऽथांगिरास्तथा कर्दमोऽथश्चसप्तैतेदक्षपुत्राःप्रकीर्तिताइत्यन्यत्रोक्ताः एकविंशतिःमरीच्या
दयःसप्तमश्चतुर्दशेति यत्रोक्तंब्रह्मोपपुराणे ऋषयःसप्तपूर्वेयेमनवश्चतुर्दश एतेप्रजानांपतयएभिःकल्पःसमाप्यतइति ३२ विष्णोर्विश्व
तिंपालनकर्मप्रधानामाह पुरुषश्चेति यंमत्स्यकूर्ममेरालादिविग्रहं ३४ ७ ७ ७ ७ ७

स्त्राणोर्विभूतीः संहारकर्मप्रधानाः आह यक्षाइति ततोऽस्मादब्रह्मणोऽर्थाद्याः कृत्स्नसंसारसंहारकृत्तानप्रधानाः ३५ आपइत्यादिकंषड्विधपुरुषभोग्यभूत लक्षणं दिशः द्यौरित्येताभ्यां तदभिमानिनोऽवदत्सूर्योगृह्येते अंतरिक्षंआकाशः एतच्चमूर्त्यष्टकंस्त्राणोरेवविभूतिः ३६ संवत्सरादिःकालोपसंहार कारकत्वात्स्त्राणोरेवविभूतिः ३७ यच्चान्यदपिदृश्यतेश्रूयतेवातत्सर्वंततएवोद्भवतीतिपूर्वेणसंबंधः ३७ यद्यदंदृश्यतेवाश्रूयतेरूपादिश्रोत्रादिरूपं तत्तद्धर्मसुखदुःखादिसाक्षिदृश्यंतत्सर्वंयुगक्षयेकल्पांतेपुनःसंक्षिप्यते कूर्मांगवन्निरोभवति अधिष्ठानेब्रह्मण्येवशुक्तिविवरजतं ३८ प्रति

यक्षाःसाध्याःपिशाचाश्चगुह्यकापितरस्तथा ततःप्रसूताविद्वांसःशिष्टाब्रह्मर्षिसत्तमाः ३५ राजर्षयश्चबहवःसर्वैःसमुदितागुणैः आपोद्यौःपृथिवीवायुरंतरिक्षंदिशस्तथा ३६ संवत्सरर्तवोमासाःपक्षाहोरात्रयःक्रमात् यच्चान्यदपितत्सर्वंसम्भूतंलोकसाक्षिकं ३७ यादृदृश्यतेकिंचिद्भूतेस्त्रावरजंगमे पुनःसंक्षिप्यतेसर्वंजगत्सर्वंयुगक्षये ३८ यथार्त्तौहृतुलिंगानिनानारूपाणिपर्यये दृश्यंतेतानिनान्येव तथाभावायुगादिषु ३९ एवमेतदनाद्यंतेभूतसंहारकारकं अनादिनिधनंलोकेचक्रंसंपरिवर्त्तते ४० त्रयस्त्रिंशत्सहस्राणित्रयस्त्रिंशच्छता निच त्रयस्त्रिंशच्चदेवानांसृष्टिःसंक्षेपलक्षणा ४१

कल्पसृष्टेःसमाननामरूपत्वमाह यथेति ३९ कल्पानामानंत्यमाह एवमिति अनाद्यंतंपरमात्मावगत्यवसाने ४० एवंपिंडब्रह्मांडात्मिकांसृष्टिमुक्त्वातदभिमानि चेतनसृष्टिमाह त्रयस्त्रिंशदिति शाकल्यब्राह्मणेत्रयश्चत्रीणिशतत्रयश्चत्रीणिसहस्रेत्याद्यपकल्पमहिमानएवैषामेतेत्रयस्त्रिंशत्वैदेवाइत्यत्रैकेस्वयस्त्रिंशद्देवदेवताः तावंतिशतानिसहस्राणिवातेषामेवविभूतिरित्यर्थः तेचाष्टौवसवएकादशरुद्राद्वादशादित्याइंद्रःप्रजापतिश्च तत्रवसवःपृथिव्यग्न्यंतरिक्षवायू आदित्यद्यौ चंद्रोनक्षत्राणिचरुद्राएकादशेंद्रियाणि आदित्याद्वादशमासाः इंद्रःपर्जन्यःप्रजापतिर्यज्ञः सोयंसृष्टिसंक्षेपः विस्तरस्त्वन्यत्रोक्तः तिस्रःकोट्यस्तरुद्राणा

मादित्यानांद्वादशस्मृताः अष्टौनांपुत्रपौत्रेतुसख्यानुनैवशक्यतइतिकृतमेकादेवतेतिप्राणइतिसत्रेसत्यपसंहारेनत्रैवोक्तमेकंस्त्रात्मानंचेतनंविवक्षितत्वात् वि
४१ भूतयोन्येचेतनाद्दत्याह दिवःपुत्रइत्यादिना दिवोनानारूपेणद्योतमानायामायायाःपुत्रइवगर्भस्त्वात्मायायांप्रतिबिंबःसूत्रात्मेत्यर्थः तस्यैवाववाहहृद्भा
न्यादयएकादशसमनस्केंद्रियाधिष्ठातृदेवताः दिवाकीर्त्यचेतोभिवर्द्धीरेंद्रमित्रप्रजापतिबृहस्पतिसंज्ञाअपिअत्रसूर्यपर्यायैरेवानिधीयंते सूर्यआ त्माजगतस्तस्थुषश्चेतिश्रुतेस्तद्विभूतयोन्यादेवताइतिस्तेश्चदिगादीनांसूर्यविभूतित्वात् ४२ अत्रबृहदादिपदार्थस्तु बृहद्द्योममयत्वेनश्रोत्रमिंद्रियमुच्य
ते द्रव्याणांभासनाद्भानुरहेनोक्तत्वगिंद्रियं १ चक्षुःप्रसिद्धमात्मेतिप्रेयस्त्वादत्रेंद्रियं वागग्निर्देवतत्वेनविभावसुरुपदोदिता २ कर्मणांप्रसवात्सणीमतो

दिवःपुत्रोबृहद्भानुश्चक्षुरात्माविभावसुः सवितासहस्रांशुर्मरीचिर्भानुराशावहोरविः ४२
पुषाविवस्वतःसर्वमन्वंतेषुतथावरः देवश्चाद्भुतनयस्तस्यसूश्चाऽदितिस्ततः स्मृतः ४३

शक्तिरहितो विशिष्टगतिमत्वादप्यर्कःपादोदृश्यमतं २ उपरुक्षःस्यादृचीकाश्यऋचोसर्वोगतेर्जसांसंगमोरश्मिकालेत्रेत्येवमेवमरीचिकः ४ वायुराशाव हयोरुभासनादवनाच्चभानुरहीश्चोच्यतेसोघ्राणपायुपदोदितावितिं ५ ४२ पुत्राःप्रतिबिंबाःविवस्वतःसूर्यवत्सर्वविभासकस्यचैतन्यस्य पु
त्राविवस्वतइतिपाठेविवस्वतःसंबंधीदिवःपुत्रइतियोज्यंसहबृहद्भानुःसचसूरिरितितच्छब्दप्रत्येकंसंबध्यते महानेवमत्यःस्वार्थेयण् तेषामध्येवरःश्रेष्ठःबुद्धित्वा
भिमानीत्यर्थः तस्यतनयोदेवभ्राट् देवेंद्रियैर्भ्राजतेदीप्यतेइतिअहंकारोदेवभ्राट् अहमिदंपश्यामिअहंशृणोमीत्याद्यनुभवात् तस्यपुत्रःसूर्याद्भाति
कंमनः तद्विसंकल्पविकल्पात्मकंमत्सर्वविषयंसंकल्पकंतन्निषयरूपेणसुतरांसृष्टं भ्राजतेइतिसूर्याद् पदवाच्ये यथोक्तंऋक्सपादैःरूपादयोविषयाःसं
कल्पकृताइति ४३ रत्नगर्भस्तु तत्रसंज्ञासहार्ययोरतिबाहुल्यंवक्तुंतन्मध्येसंक्षेपतोदेवानांसृष्टिमाह त्रयस्त्रिंशदादि त्रयस्त्रिंशद्यानितान्येवशतानिवि

त्रयस्त्रिंशत्कोटिसंख्यैर्देवैः परिवृतः सन् त्रयस्त्रिंशत्कोटिसंख्यान् देवान् सृजतीत्यर्थः देवानां सृष्टिः सृज्यमानादेवाः रुद्रादिहितोभावोद्रव्य
बलकाशतइतिन्यायात् यद्वा त्रयस्त्रिंशदधिकशतत्रययुक्तषट्त्रिंशत्सहस्राणि देवानांसंसेवतः तत्रतावद्वर्त्तमानोजन्मसमनंतरमेवप्रथमकल्पेसृष्टिमाह दिवः
पुत्रइत्यादिना अतएतत्कल्पीयसूर्यवंशसृष्टिक्रमविरोधोनाशंकनीयः दिवःपुत्रइत्येकंनाम दिवःपुत्रादयोद्वादशविवस्वतःसूर्याजाताःनकारलोपश्छांदसः तेषां
मध्येवरःकनिष्ठः मध्यइतिचपाठः तस्यपृथक्कनिर्देशोवंशकरत्वात् तेभ्यः मध्यवंशेभ्यः एवायमेतत्कल्पीयकुरुवंशादिसदृशस्तस्मिन्कल्पेपिएषांवंशानांसंभवात्
अतएवयदुभरतययातिवंशानांपृथगुपादानं यद्वातेभ्यएवेदानींइहोत्पन्नेभ्यःकुरुवंशादयइत्यर्थः विमलेबोधव्याख्यात्रादिवःपुत्रइत्यारभ्यसंभूताबहवोवंशाइत्यंते
न नवुद्वोवंशोराजामिद्वोक्ष्वाकुर्वंशश्चंद्रवंशाश्च तत्रादित्यवंशस्तावद्वक्तव्यो मरीचिः मरीचेःकश्यपः कश्यपात्विवस्वान् विवस्वतोमनुः मनोरिक्ष्वाकुः इक्ष्वाको
र्विकुक्षिःसएवंशादयः ततःकुक्षुः तस्मादनेनाः ततपृथुः पृथोः आतंतोवहदश्वः तस्माद्धुंधुमारादयोयावन्मरुत्तइतितावदादित्यवंशाः सोमवंशस्तावत्
ब्रह्मणोत्रिः अत्रेःसोमः सोमाद्बुधः ततःपुरूरवाः ततश्चायुः आयोर्नहुषः ततोययातिः ययातेःपुरुप्रभृतयोयावद्देवयुरुपुत्रइति एतौद्वौ
राजवंशौततःक्रोष्टोर्वंशः तत्रादिवःपुत्रादयोराजानः तथापुराविवस्वतश्चेतिनसंगतं विवस्वतःपूर्वंकश्यपःततःपूर्वंब्रह्मा ततश्चकथमुच्येतेपुराविवस्वतश्चेति तथासति
जस्रत्रयःपुत्रादशज्योतिरादयः इत्यपिसंगतंतेहिदशज्योतिरादयः पार्थिवाःउभयोरपिवंशयोःपुराणेतिहासादिषुनश्रूयंते कांचिदसंगतिर्नात्र तत्रदिवःपु
त्रस्तावदादित्यएवस्वरश्मिभिः दिवःपूरणात्तद्रहद्भानुरपिसएवबृहत्तोविश्वव्यापकाःभानवोस्येति चक्षुर्विश्वप्रकाशकत्वात् आत्माचसएवसहित्रह्म
ज्योतिरित्यागमप्रामाण्यात् विभावसुश्चसएवऋतुषुविविधप्रकारारश्मयोयस्य सविताचसएवऋतुक्रमेणसर्वान् मरीचिः सएवलोकोपकारार्थंमरीचीं
रुकायतीतिकीर्त्यतिप्रकाशयतीतियावत् मरीचिभिः सहस्ररश्मिभिःकीर्त्यतइतिवा अर्कश्चसएवतोमृतोधातुरस्यकृत्यर्थेगुणः आहवश्चसएवतो
त्तमोधातुस्तस्मात्कृत्ययः स्मृतः गतौयस्मात्परोनास्तितस्मादर्कःसउच्यते भानुःसएवलोकोपकारार्थंभानोतिप्रकाशतीतिभानुः आशावहइतिलोकानांआ

शांआवहतिआराध्यमानःसफलीकरोति राधारति श्रवतिरक्षणेधातुः प्रत्ययेस्यरुडागमः श्रवतिनीतिमालोकांस्तेनासोरविरुच्यतइति पुरेतिपुराकल्पे
एतेदिवःपुत्रादयःपुंशब्दःविवस्वतोवाचकापठ्यंतेपुराकविभिः तेषांशब्दानांमध्येवरोजघन्योमध्यशब्दः मध्यशब्दोपिगर्भधारकवाचकतयापावनाद्वाअ
नघतयापठ्यते मध्योमहीगर्भोधारकत्वात् उक्तंच पौषस्यकृष्णसप्तम्यामध्यासहभवेद्रविः देवव्रतनयस्तस्यांति तस्यमध्यानंतरंदेवान्भ्राजयतिर
श्मिभिः तनयोविस्तारकः तस्मादनंतरंस्वभ्राडितिस्वपुत्रशीलाःपुत्राःस्वभ्राजसोनंतरंत्रयःपुत्राःदशज्योतिरादयोग्रहनक्षत्रतारकाःप्रकाशकारश्मयःभा
डुरासन् तेचपूरणाज्जगतस्त्राणाद्वापावनाद्वाःनघयोनिलातुत्राउच्यंते बडुराश्व्यास्येतिसूत्रेपुपुत्रशब्दोरश्मिषुदृष्टःविस्तरातिशयान्नपठ्यते श्रत्रदशश
तसहस्रशब्दोरश्मिबहुत्ववाचकोम्लेच्योयंकुरुवंशश्चेत्यापुच्चावंशोभयवंशप्रभवराजाभिधानमस्तुसूर्यस्योभयवंशहेतुत्वकथनपरं तथाहि श्रादि
त्यान्मनुःमनोरिक्ष्वाकुरित्यादिपौत्रःसूर्यवंशः तथादित्यान्मनुःमनोरिडाइडातःपुरूरवाइत्यादिनादौहित्रःसोमवंशइति श्रतःएभिःश्लोकैरादित्यसंज्ञातिभिः
स्तन्मूलकत्वंकथितं उक्तंच श्रादित्यमूलमखिलंत्रैलोक्यंपडुनंदन भवत्यस्माज्जगत्सर्वंसदेवासुरमानुषमित्यादिसर्वमवदातं ७ ७

दशज्योतींषि धूम्रार्चिरूष्माज्वलिनीज्वालिनीविस्फुलिंगिनी सुश्रीःसुरूपाकपिलाहव्यकव्यवहानयेति दशकलारूपाणियस्यसदृशज्योतिरग्निः शतज्योतिश्चेंद्रः सहि हृदयायतनः वेदमाभनसोभूत्वाहृदयंप्राविशदितिश्रुतेः हृदयस्यवशातंचैकानाड्यःतासांमूर्ध्न्यासौरश्मिमुच्चिष्ठानप्रापिकाइतराःशातंजन्मान्तरहेतुगतिप्रदाः तासांप्रकाशकत्वाच्चेंद्रःशतज्योतिःसहस्रज्योतिःसूर्यः ४४ ज्योतेरितीदंतत्वमार्ष ४५ तेभ्यःसमष्टिमनःकल्पितेभ्योग्निसूर्यचंद्रेभ्यःक्रमात्त्रयेपुरोवत्तद्ब्राह्मणवंशःकुर्वादिवंशरक्ष्वाकुवंशश्चसंभूताइतियोज्यं त्रय्येयोवेब्राह्मणइतिश्रुतेब्राह्मणस्याग्निवंश्यत्वं इतरेषांचंद्रसूर्यवंश्यत्वंप्रसिद्धमेव ४६ राजर्षीणां राज्ञामृ

ऋक्षाजह्नुत्रयःपुत्राःप्रजावंतोबहुश्रुताः दशज्योतिःशतज्योतिःसहस्रज्योतिरेवच ४४ दशपुत्रसहस्राणिदशज्योतेर्महात्मनः ततोदशगु णाश्चान्येशतज्योतेरिहात्मजाः ४५ भूयस्ततोदशगुणाःसहस्रज्योतिषःसुताः तेभ्योयंकुरुवंशश्चयदूनांभरतस्यच ४६ ययातीक्ष्वाकुवंशा श्चराजर्षीणांचसर्वशः संभूताबहवोवंशाभूतसर्गाःकविस्तराः ४७ भूतस्थानानिसर्वाणिरहस्यत्रिविधंचयत् वेदायोगाःसविज्ञानोधर्मोर्थकाम एवच ४८

पाणांचबहुधाभूतसर्गाःजरायुजांडजस्वेदोद्भिज्जसंश्रयः ४७ भूतस्थानानीति नृणांवासस्थानानि राजकृतानिदुर्गनगरादीनि ब्राह्मणकृतानितीर्थक्षेत्रादीनि त्रिविधंरहस्यंधर्मरहस्यंकृत्स्नंद्वोहणेपिशिसुपालस्यहृत्स्थैकृतशक्तिः तत्ररहस्यंयथाकथंचित्रीत्राभिनिवेशेनध्यानमेवश्रे यइति सोधर्माभासोपिधर्मएव तथाहिंसाफलोधर्मोप्यधर्मएव यथासत्यवादिनश्चोरेभ्यःकार्पटिकमार्गतत्त्वेनोपदिशतः इतिएवंअर्थकामयोरपिरह स्यंऊह्यं वेदाःकर्मकांडाःयोगउपासनाकांडाःसविज्ञानोज्ञानकांडसहितःधर्मःस्मार्तःअर्थकामौलोकप्रसिद्धौ ४८ ७ ७ ७ १४

धर्मेति एतत्त्रयप्रतिपादकानिशास्त्राणिमीमांसाकोककामंदकानि लोकयात्राविधानंचलोकयात्रायेननिर्वहतितस्यआयुर्वेदधनुर्वेदगांधर्ववेदादेर्विधानंशाप नेच एतत्सर्वेतेभ्यःसंभूतेरतिदृष्टेनसंबंधःसर्वंतत्दृष्टवानृषियोगबलेन ऋषिर्व्यासः सर्वेषाख्याःव्याख्यामधिकृत्यकृतोग्रंथोवेदाख्यातमुक्ताः यथाब्रह्मविदाप्नो तिपरमितिसूत्रस्यव्याख्यासत्यंज्ञानमितिमंत्रः अनुव्याख्यानंतत्साक्षात्तात्पर्यवृत्तिमादायोक्तार्थानांविवरणग्रंथः प्रपंचनंतदर्थानांविस्तरेणोपपादनं यत्रयेसूत्रितस्यार्थस्यद्वितीयतृती याभ्यांव्याख्यानमुत्तरग्रंथेनानुव्याख्यानंच विविधाःलिंगादिनाऽर्थप्रत्यायकाःप्रपाःकर्तव्याइत्यादिस्मृतिमूलभूताःधर्मनिबंधप्रपाःअस्मित्वमयेऽहल्यादयः हे

धर्मकामार्थयुक्तानिशास्त्राणिविविधानिच लोकयात्राविधानंचसर्वंतःदृष्टवानृषिः ४९ इतिहासाःसवेषाख्याविविधाःश्रुतयोपिच इहसर्वमु च्चिष्टमुक्तंग्रंथस्यउच्छिष्टं ५० विस्तीर्यैतन्महज्ज्ञानमृषिःसंक्षिप्यचाब्रवीत् इष्टंहिविदुषांलोकेसमासव्यासधारणं ५१ मन्वादिभारतंकेचि दास्तीकादितथापरे तथोपरिचराद्यन्येविप्राःसम्यगधीयते ५२ विविधंसंहिताज्ञानंदीपयंतिमनीषिणः व्याख्यातुंकुशलाःकेचिद्ग्रंथान्धारयितुं परे ५३

अथेतंधनूनिरुदकेप्रदेशेप्रपेक्लोकतृप्तिकरोसीतिनदर्थःप्रपाअसीत्यसंधिश्छांदसः इहेतिअनुक्रांतेअनुक्रमेणोक्तं इदमेवयथोक्तंग्रंथस्यउ च्छिष्टंविषयःप्रतिपाद्योर्थः ५० समासःसंक्षेपः व्यासःविस्तरः ५१ वर्णानुपूर्व्यभेदेपिप्रतिकल्पंअर्थानांसमाननामरूपक्रमत्वात्भारतादेमन्वादेमतभेदमाह म न्वादीति मनुर्मंत्रः नारायणंनमस्कृत्येति ओंनमोभगवतेवासुदेवायेतिवाक्यादि इतियाचः दिवःपुत्रोवैवस्वतमनुसंज्ञोमनुस्तदादीतितत्तं आस्तीकं आस्तीकचरितंतदादि उपरिचरोवसुस्तचरितादिवा ५२ बहुर्थत्वाद्विविधंज्ञानंदीपयंति ५३ ७ ७ ७ ७

व्यस्येवेदमाध्वर्यवादिकोऽशोविभज्यतेनवेदार्थोनसंस्मृतइतिदर्शितं ५४ ५५ तदाख्यानवरिष्ठंसइत्यादिश्लोकेयमभरेरपीत्यतोग्रंथःस्पष्टः

तपसाब्रह्मचर्येणव्यस्येवेदंसनातनं इतिहासमिमंचक्रेपुण्यसत्यवतीसुतः ५४ पराशरात्मजोविद्वान्ब्रह्मर्षिःसंशितव्रतः तदाख्या नवरिष्ठंसकृत्वाद्वैपायनःप्रभुः ५५ कथमध्यापयानीहशिष्यानित्यचचिंतयत् तस्यतच्चिंतितंज्ञात्वाऋषेर्द्वैपायनस्यच ५६ त त्राजगामभगवान्ब्रह्मालोककुरुःस्वयं प्रीत्यर्थंतस्यचैवर्षेर्लोकानांहितकाम्यया ५७ तंदृष्ट्वाविस्मितोभूत्वाप्राञ्जलिःप्रणतःस्थि तः आसनंकल्पयामासमर्वैर्मुनिगणैर्वृतः ५८ हिरण्यगर्भमासीनंतस्मिंस्परमासने परिवृत्यासनाभ्याशेवासवेयस्थितोभवत् ५९ अनुज्ञातोथकृष्णस्तुब्रह्मणापरमेष्ठिना निषसादासनाभ्याशेप्रीयमाणःशुचिःस्मितः ६० उवाचसहोमतेजापरंब्रह्मापरमेष्ठि नं कृतंमयेदंभगवन्काव्यंपरमपूजितं ६१ ब्रह्मवेदरहस्यंचयच्चान्यत्स्वयंपितंमया सांगोपनिषदांचैववेदानांविस्तरक्रिया ६२ इतिहासपुराणानामुन्मेषंनिर्मितंचयत् भूतभव्यभविष्यंचत्रिविधंकालसंज्ञितं ६३ जरामृत्युभयव्याधिभावाभावविनिश्चयः वि विधस्यचधर्मस्याश्रमाणांचलक्षणं ६४ चातुर्वर्ण्यविधानंचपुराणार्थंचकृत्स्नशः तपसोब्रह्मचर्यस्यपृथिव्याश्चंद्रसूर्ययोः ६५ ग्रहनक्षत्रतारांणांप्रमाणंचयुगैःसह ऋचोयजूंषिसामानिवेदाध्यात्मंतथैवच ६६ ७ ७ ७

र्थः ५६ ५७ ५८ अस्यासेसमपि वसूरुपरिचरःतस्यकन्यावासवीसत्यवतीतस्याःपुत्रोवासवेयोव्यासः ५९ कृष्णःव्यासः ६० ६२ उन्मे षंउपबृंहणं ६३ ६६

पाशुपतंपशूनांजीवानांपत्करंतर्यामिणइदंमहात्म्यंपाशुपतं हेतुनासात्विकादिकर्मणासमंतुल्यं ६७ ६८ कल्पानांधनुर्वेदोक्तशास्त्रादिविधीनांवा कल्पःशास्त्रविधौन्यायेसवर्णेब्रह्मणोदितइतिमेदिनी वाक्यजातिविशेषाःराजामात्यचेटादिवत्कविशेषप्रयुक्तवैलक्षण्यानिस्फुटानिदान्यायदे

न्यायशिक्षाचिकित्साचदानंपाशुपतंतथा हेतुनैवसमंजन्मदेवमानुषसंज्ञितं ६७ तीर्थानांचैवपुण्यानांदेशानांचैवकीर्तनं नदीनां पर्वतानांचवनानांसागरस्यच ६८ पुराणंचैवदिव्यानांकल्पानांयुद्धकौशलं वाक्यजातिविशेषाश्चलोकयात्राक्रमस्यच ६९ य च्चापिसर्वगंवस्तुतच्चैवप्रतिपादितं परंनलेखकःकश्चिदेतस्मादुपलभ्यते ७० ब्रह्मोवाच तपोविशिष्टादपिवेविशिष्टान्मुनिसंच यात् मन्येश्रेष्ठतरंत्वांवैरहस्यज्ञानवेदनात् ७१ जन्मप्रभृतिसत्यंतेवैश्यगर्भब्रह्मवादिनी त्वयावाक्यमिदंकृतंतस्मात्काव्यंभविष्य ति ७२ अस्यकाव्यस्यकवयोनसमर्थाविशेषणे विशेषणेगृहस्थस्यशेषास्त्वयृषयोश्रमाः ७३ काव्यस्यलेखनार्थायगणेशःस्मर्य तांमुने। सौतिरुवाच एवमाभाष्यतंब्रह्माजगामस्वनिवेशनं ७४ ततःसंस्मारहेरंबंव्यासःसत्यवतीसुतः स्मृतमात्रोगणेशानो मकविंतितपूरकः ७५ तत्राजगामविघ्नेशोवेदव्यासोयतःस्थितः पूजितश्चोपविष्टश्चव्यासेनोक्तस्तदानघ ७६ ७ ७

शादयोवापरकृत्यादिरूपार्थवादभेदावलोकयात्राक्रमोनीतिशास्त्रं ६९ ७० मुनिसंवयात् मुनिसमूहात् विशिष्टात्कुलेन ७१ गोवावेब्रह्मवा दिनीवेदवादिनी ७२ विशेषणेऽतिशयेन ७३ ७४ ७५ यतःयत्रदेशे ७६ ७ ७ ७ ७ ७ ७ ७

७७ ७८ अबुध्वात्मर्थमितिशेषः ओमित्यंगीकारे ७९ ग्रंथग्रंथिंग्रंथेदुर्भेद्यस्थाने ८० ८१ श्लोककूटंश्लोकेषुगूढार्थं अन्यार्थत्वेसति-अर्थांतरप्र
त्यायकत्वमित्यर्थः अर्थस्यप्रमेयस्यगूढत्वात् प्रश्नितस्यप्रमेयेणसप्रकाशार्थंश्रितंशब्दप्रमाणंतस्यापिगौण्यादिवृत्तिभेदेनगूढत्वंयथामत्स्यः स्व

लेखकोभारतस्यास्यभवत्वंगणनायक मयैवप्रोच्यमानस्यमनसाकल्पितस्यच ७७ श्रुत्वैतत्त्राहविघ्नेशोयदिमेलेखनीक्षणं लि
खितोनावतिष्ठेततदास्यांलेखकोह्यहं ७८ व्यासोप्युवाचतंदेवमबुध्वामालिखक्वचित् ओमित्युक्त्वागणेशोपिबभूवकिलले
खकः ७९ ग्रंथग्रंथिंतदाचक्रेमुनिर्गूढंकुतूहलात् तस्मिन्प्रतिज्ञयाप्राहमुनिर्द्वैपायनस्त्विदं ८० अष्टौश्लोकसहस्राणिअष्टौश्लो
कशतानिच अहंवेद्मिशुकोवेत्तिसंजयोवेत्तिवानवा ८१ तत्श्लोककूटमद्यापियथितंहृदंमुनेः भेत्तुंनशक्यतेर्थस्यगूढत्वा
त्प्रश्रितस्यच ८२ सर्वज्ञोपिगणेशोयत्क्षणमास्तेविचारयन् तावच्चकारव्यासोपिश्लोकानन्यानबहूनपि ८३ अज्ञानतिमिरां
धस्यलोकस्यतुविचेष्टतः ज्ञानांजनशलाकाभिर्नेत्रोन्मीलनकारके ८४ धर्मार्थकाममोक्षार्थैःसमासव्यासकीर्तनैः तथाभारत
सूर्येणहृणांविनिहतंतमः ८५ पुराणपूर्णचंद्रेणश्रुतिज्योत्स्नाःप्रकाशिताः हृबुद्धिकैरवाणांचकृतमेतत्प्रकाशनं ८६ ७

भ्रडमभिमिषतीति ८२ मतयदायावत् ८३ कारकमितितुमुण्वुलोक्रियायांक्रियार्थायामितिण्वुलोनेन्मीलनंकर्तुमित्यर्थः एतत्प्रकाशनं राम
कृतमितितृतीयेनान्वयः ८४ ८५ प्रकाशनंविकसनं ८६ ७ ७ ७ ७ ७ ७ ७ १६

८७ विटंकाः पक्षुपवेशस्थानानि कपोतपालिकायांतुविटंकःपुन्नपुंसकमित्यमरः ८८ सोमज्ञा ८९ विश्राम्येत्यस्यामितिविश्रामस्थाया ९० आ
श्रमेति आश्रमवासिकुशेशिलः मोसलादिग्रंथः श्रुतिस्मृतीयदीर्घशाखोक्तः ९१ ९२ पुष्पंधर्मःफलंमोक्षः तदुभयंसत्यास्वंपुष्पंहिफलं

इतिहासप्रदीपेनमोहावरणघातिना लोकगर्भगृहंकृत्स्नंयथावत्संप्रकाशितं ८७ संग्रहाध्यायबीजोवैपौलोमास्तीकमूलवान् सं
भवःस्कंदविस्तारःसभाऽरण्यविटंकवान् ८८ आरणीपर्वरूपाद्योविराटोद्योगसारवान् भीष्मपर्वमहाशाखोद्रोणपर्वपलाशवान्
८९ कर्णपर्वशितैःपुष्पैःशल्यपर्वसुगंधिभिः स्त्रीपर्वैषीकविश्रामःशांतिपर्वमहाफलः ९० अश्वमेधामृतरसस्त्वाश्रमस्थान
संश्रयः मौसलःक्रतिसंक्षेपःशिष्टद्विजनिषेवितः ९१ सेवेषांकविमुख्यानामुपजीव्योभविष्यति पर्जन्यइवभूतानामक्षयोभार
तद्रुमः ९२ सूतउवाच तस्यवृक्षस्यवक्ष्यामिशाश्वतुष्पफलोदयं स्वादुमेध्यरसोपेतमेष्टंसमरैरपि ९३ मातुर्नियोगाद्
यौत्मागांगेयस्यचधीमतः क्षेत्रेविचित्रवीर्यस्यकृष्णद्वैपायनःपुरा ९४ त्रीनग्नीनिवकौरव्यान्जनयामासवीर्यवान् उत्पाद्यधृतराष्ट्रंच
पंडुंविदुरमेवच जगामतपसेधीमान्पुनरेवाश्रमंप्रति ९५ तेषुजातेषुवृद्धेषुगतेषुपरमांगतिं अब्रवीद्भारतंलोकेमानुषेस्मिन्महा
ऋषिः ९६

वावःसत्यमितिश्रुतेः अतएवकर्मात्स्वाडुत्वंअमेध्यंच ९४ भारतसूत्रभूतश्लोकत्रयमाह मातुरिति मातुःसत्यवत्याः गांगेयस्यनियोगात्तनयेषु
त्रिकादिषु क्रमेणधृतराष्ट्रादीन्जनयामास ९४ ९५ तेषुधृतराष्ट्रादिषुजातेषुपुत्रपौत्रादिरूपेणप्रादुर्भूतेषुवृद्धेषुराज्यभागिषुपुत्रपौत्रादीनांराज्यार्थि
नां परमांगतिंमृत्युंगतेषु ९६

९७ शशासत्वमेतान्भारतेश्रावयेत्याज्ञापितवान्कर्मांतरेषुकर्मक्षिप्तेषु ९८ क्षत्तुर्विदुरस्य ९९ धार्त्तराष्ट्राणांदुर्योधनादीनां १०० तावत्तावत्संख्याके १०१
अध्यर्द्धशतेसार्धशते १०२ शुकप्रहणंतत्सदृशायैवदेयमितिज्ञापनार्थं १०३ षष्टिंशतसहस्राणिषष्टिलक्षाणिश्लोकाः ४ ५ ६ अस्मिन्निति

जनमेजयेनपृष्टःसन्ब्राह्मणैश्चसहस्रशः शशासशिष्यमासीनंवैशंपायनमंतिके ९७ ससदस्यैःसहासीनःश्रावयामासभारतं
कर्मांतरेषुयज्ञस्यचोद्यमानःपुनःपुनः ९८ विस्तरंकुरुवंशस्यगांधार्याधर्मशीलतां क्षत्तुःप्रज्ञांधृतिंकुंत्याःसम्यग्द्वैपायनोब्रवीत् ९९
वासुदेवस्यमहात्म्यंपांडवानांचसत्यतां दुर्नयंधार्त्तराष्ट्राणामुक्तवान्भगवानृषिः १०० चतुर्विंशतिसाहस्रींचक्रेभारतसंहितां उपा
ख्यानैर्विनातावद्भारतंप्रोच्यतेबुधैः १ ततोध्यर्द्धशतंभूयःसंक्षेपंकृतवानृषिः अनुक्रमणिकाध्यायंवृत्तांतानांसपर्वणां २ इदंद्वैपा
यनःपूर्वंपुत्रमध्यापयत्सुकं ततोन्येभ्योनुरूपेभ्यःशिष्येभ्यःप्रददौविभुः ३ षष्टिंशतसहस्राणिचकारान्योससंहितां त्रिंशत्तसह
स्रंचदेवलोकेप्रतिष्ठिते ४ पित्र्येपंचदशप्रोक्तंगंधर्वेषुचतुर्दश एकंशतसहस्रंतुमानुषेषुप्रतिष्ठिते ५ नारदोश्रावयेद्देवा नसि
तोदेवलःपितॄन् गंधर्वयक्षरक्षांसिश्रावयामासवैसुकः ६ अस्मिंस्तुमानुषेलोकेवैशंपायनउक्तवान् शिष्योव्यासस्यधर्मा
त्मासर्ववेदविदांवरः ७ एकंशतसहस्रंतुमयोक्तंवैनिबोधत ७ ७ ७ ७ ७ ७ ७

राम

मयाउच्यमानंवैशंपायनेनउक्तंनिबोधत अर्थतोबुध्यध्वं ७ श्रीरामजयरामजयजयरा श्रीनमोभगवतेवासुदेवायश्रीगोपालाय १७

इदानींभारततात्पर्यसंग्राहकोद्वौश्लोकौपठति दुर्योधनइति मन्युःक्रोधः तेनद्वेषेर्ष्यासूयादिकमपिगृह्यतेतन्मयोमहान्वृक्षोद्रुमः दुर्योधनः तेनसहात्यंत
मैक्ष्यंप्राप्ताःकर्णशकुनिदुःशासनास्तस्यस्कंधशाखापुष्पादितुल्यास्तादृशाएवतस्यमूलंराजाधृतराष्ट्रःसर्वत्रअनीषीमनोनियंतृहासमर्थः तेनैवहिपुत्रस्नेहांधेन
दत्तावसरोदुर्योधनोद्रुमूलोभवत् अन्यथाबाल्यएवविदुरादिवचसातस्यत्यागेकृतेसतिगतराज्यिदानद्रौपदीकचग्रहणादिमूलःकुलक्षयोनजातःस्यात् एतेन
५ दृढाज्ञानमूलोदैन्यतरुःक्रोधलोभादिस्कंधोहिंसास्तेयादिशाखोवैरबंधनरूपादिफलपुष्पःपुरुषार्थकामैर्मूलाज्ञानछेदेननाशनीयइतिसूचितं मन्युःपुमान्
कृधिदैन्येशोकेचयजेचेतिमेदिनीकोशः ८ युधिष्ठिरइति धर्मःपुण्यंतेनतत्कारिणीभूतशमदमसत्याहिंसादिकंगृह्यतेतन्मयोमहाद्रुमःयुधिष्ठिरः तदे

सौतिरुवाच ततोनिवेशायतदाभविप्रःसंशितव्रतः महींचचारदारार्थीनदारानविंदत १ सकदाचिद्वनंगत्वाविप्रःपितृवचःस्मरन् वुकोद्वा कन्यानिक्षार्थंनिस्तोवाचःशनैरिव २ तंवासुकिःप्रत्यगृह्णादुद्यम्यभगिनींतदा नसनाम्नीतिजरयाहृतसनाम्नीतिचिंतयन् ३ सनाम्नींवोद्वहेयंभा र्यांगृह्णीयामितितस्यहृदिमनोनिविष्टमभवज्जरत्कारोर्महात्मनः ४ तमुवाचमहाप्राज्ञोजरत्कारुर्महातपाः किन्नाम्नीभगिनीयंतेब्रूहिसत्यंभुजंगम ५ वासुकिरुवाच जरत्कारोजरत्कारुरेषमेभगिनीमुनेः प्रतिगृह्णीष्वभार्यार्थेमयादत्तांसुमध्यमां ६

यज्ञेनसर्पसत्रेऽस्मिन्नार्षदत्वात्ऋत्विजोमिथुनंदत्त्वायोदैवाधर्षयोवि

वाहयोर्व्याहृतिर्दर्शिताभैक्षवदितितस्याब्राह्मप्राजापत्यविधिनाऽनलंरुतायाऽनलंरुतायाश्चलाजेपिञ्चन्नवस्त्रादिनाभरणेनमधनादिकंनास्तीतिवदर्शितं उपयं स्यपरिशेष्ये २८ ३१ त्रयोदशः निवेशायदारसंग्रहायपाठांतरेणतेब्रह्मचारी १ निस्तोवाचः कन्यांभिक्षांदेहीत्येवंरूपः २ ५ प्रतीच्छप्रतिगृह्णीष्व ६ ६

त्वदर्थंरक्षितांपूर्वंप्रतीछेमांद्विजोत्तम ६ सौतिरुवाच एवमुक्तावतःप्रादाद्भार्यार्थेवरवर्णिनी सचतांप्रतिजग्राहविधिदृष्टेनकर्मणा ७ इत्यादिपर्वणिच
तुर्दशोध्यायः सौतिरुवाच मात्राहिभुजगाशप्तःपूर्वंत्वत्याविदांवर जनमेजयस्यवोयज्ञेधक्षत्यनिलसारथिः १ तस्यशापस्यशांत्यर्थंप्रदेपत्यगोत्तमः
स्वसारमृषयेतस्मैसुव्रतायमहात्मने २ सचतांप्रतिजग्राहविधिदृष्टेनकर्मणा आस्तीकोनामपुत्रश्चतस्यांजज्ञेमहातपाः ३ तपस्वीचमहात्मावेदवेदांग
पारगः समःसर्वस्यलोकस्यपितृमातृभयापहः ४ अथदीर्घस्यकालस्यपांडवेयोनराधिपः आजहारमहायज्ञंसर्पसत्रमितिश्रुतिः ५ तस्मिन्प्रवृत्तेसत्रेतुस
र्पाणांसंततंक्षयं मोचयामासतान्नागान्नास्तीकःसुमहातपाः ६ भ्रातॄंश्चमातुलांश्चैवतथैवान्यानुसपन्नगान् पितॄंश्चतारयामाससंततंतपसान्वया ७ व्रते
श्चविविधैर्व्रतैस्तथाध्यायैश्चानृणोभवत् देवांश्चतर्पयामासयज्ञैर्विविधदक्षिणैः ८ ऋषींश्चब्रह्मचर्येणसंतत्याचपितामहान् आपहत्यगुरुंभारंपितृणांश
सितव्रतः ९ जरत्कारुर्गतःस्वर्गंसहितःस्वैःपितामहैः आस्तीकंचसुतंप्राप्यधर्मंचानुत्तमंमुनिः १० जरत्कारुःसुमहताकालेनस्वर्गमेयिवान् एतदाख्यानमास्ती
कंयश्चावष्टब्धितंनयः प्रब्रूहिभृगुशार्दूलकिमन्यत्कथयामिते ११ इत्यादिपर्वण्यास्तीके शौनकउवाच सौतेत्वंकथयस्वेमंविस्तरेणकथांपुनः आस्ती
कस्यकवेःसाधोःशुश्रूषापरमाहिनः १ मधुरंकथ्यतेसौम्यश्लक्ष्णासरपदंत्वया प्रियामेहभृशंतातपितेवेदंप्रभाषसे २ अस्मच्छुश्रूषणेनित्यंपिताहिनिरत
स्तव आचष्टैतद्यथास्थानंपितातेतंयथावद ३ ॥

जज्ञे जातः ३ पितृमातृपक्षीयाणांभयापहः पितृमातृभयापहइतिमध्यमपदलोपिसमासः ४ ५ ६ आजहारयज्ञे आत्म
नूमातुलपुत्रान् ७ १० ११ इत्याध्यायः सौतेरिति शुश्रूषाप्रेप्सुमिषा १ २ अस्मत्शुश्रूषणेअस्माकंश्रावणे आचष्टसाकल्येनयत्तंकथितवान् ३ श्रीरामजयराजयजय

कथयतःपितुःसकाशात् ४ देवयुगेसत्ययुगेरूपेणप्रकाशेनअडुतेइतिसंबंधः रूपंस्वभावेसौंदर्यंआलोकेपशुहृदयोशितमेदिनी अडुतइत्यादेःपूर्वरूपमार्षं ५ क्रातिसर्गंवि
रदानं ६ ७ तेजसादीप्त्या विक्रमेणपराभिभवसामर्थ्येन ओजसातेजसेतिपतिःओजसाइंद्रियबलेन ८ ९ पुत्रंपुनातीतितंपवित्रंवरंदिव्यपुत्रदृपलाभरूपं १० १२

सौतिरुवाच आयुष्मन्निदमाख्यानमास्तीकंकथयामिते यथाश्रुतंकथयतःसकाशाद्वैपितुर्मया ४ पुरादेवयुगेब्रह्मन्प्रजापतिसुतेषुवै आस्तीभगिन्यौ
रूपेणसमुपेतेस्तुतेनघ ५ तेभार्येकश्यपस्यास्तांकद्रूश्चविनतावह प्रादात्तांपतिवरंप्रीतःप्रजापतिसमःपतिः ६ कश्यपोधर्मपत्नीभ्यांमुदापरमयायुतः व
रातिसर्गंश्चतेवंकश्यपादुत्तमंवते ७ हर्षादप्रतिमांप्रीतिंप्रापतुःसमवरस्त्रियौ वव्रेकद्रूःसुतानान्नागानसहस्रंतुल्यवर्चसः ८ द्वेपुत्रौविनतावव्रेकद्रूपुत्राधि
कौबले तेजसावपुषाचैवविक्रमेणाधिकौवृतौ ९ तस्यैभर्त्तावरंप्रादादस्त्यर्थंपुत्रमीप्सितं एवमस्त्वितितंवाहकश्यपंविनतातदा १० यथावत्प्रार्थितंलब्धावरं
वुष्टनवत्तदा कृतकृत्यातुविनतालब्ध्वावीर्याधिकौसुतौ ११ कद्रूश्चलब्ध्वापुत्राणांसहस्रंतुल्यवर्चसां धार्योप्रयत्नतोगर्भोविस्फोटासमहातपाः १२
तेभार्येवरसंतुष्टेकश्यपोवनमाविशत् १२ सौतिरुवाच कालेनमहताकद्रूरंडानांदशतीर्दश जनयामासविप्रेंद्र द्वेचांडेविनतातदा १३ तयोरंडानि
निदधुःप्रहृष्टाःपरिचारिकाः सोपस्वेदेषुभांडेषुपंचवर्षशतानिच १४ ततःपंचशतेकालेकद्रूपुत्राविनिसृताः अंडाभ्यांविनतायास्तुमिथुनंनव्यदृश्यत १५

यथाश्रुतंकथयतःपितुःसकाशात् ४ देवयुगेसत्ययुगेरूपेणप्रकाशेनअडुतेइतिसंबंधः रूपंस्वभावेसौंदर्यंआलोकेपशुहृदयोशितमेदिनी अडुतइत्यादेःपूर्वरूपमार्षं ५ क्रातिसर्गंवि
रदानं ६ ७ तेजसादीप्त्या विक्रमेणपराभिभवसामर्थ्येन ओजसातेजसेतिपतिःओजसाइंद्रियबलेन ८ ९ पुत्रंपुनातीतितंपवित्रंवरंदिव्यपुत्रदृपलाभरूपं १० १२

सौतिरुवाच आयुष्मन्निदमाख्यानमास्तीकंकथयामिते यथाश्रुतंकथयतःसकाशाद्वैपितुर्मया ४ पुरादेवयुगेब्रह्मन्प्रजापतिसुतेषुवै आस्तीभगिन्यौ
रूपेणसमुपेतेस्तुतेनघ ५ तेभार्येकश्यपस्यास्तांकद्रूश्चविनतावह प्रादात्तांपतिवरंप्रीतःप्रजापतिसमःपतिः ६ कश्यपोधर्मपत्नीभ्यांमुदापरमयायुतः व
रातिसर्गंश्चतेवंकश्यपादुत्तमंवते ७ हर्षादप्रतिमांप्रीतिंप्रापतुःसमवरस्त्रियौ वव्रेकद्रूःसुतानान्नागानसहस्रंतुल्यवर्चसः ८ द्वेपुत्रौविनतावव्रेकद्रूपुत्राधि
कौबले तेजसावपुषाचैवविक्रमेणाधिकौवृतौ ९ तस्यैभर्त्तावरंप्रादादस्त्यर्थंपुत्रमीप्सितं एवमस्त्वितितंवाहकश्यपंविनतातदा १० यथावत्प्रार्थितंलब्धावरं
वुष्टनवत्तदा कृतकृत्यातुविनतालब्ध्वावीर्याधिकौसुतौ ११ कद्रूश्चलब्ध्वापुत्राणांसहस्रंतुल्यवर्चसां धार्योप्रयत्नतोगर्भोविस्फोटासमहातपाः १२
तेभार्येवरसंतुष्टेकश्यपोवनमाविशत् १२ सौतिरुवाच कालेनमहताकद्रूरंडानांदशतीर्दश जनयामासविप्रेंद्र द्वेचांडेविनतातदा १३ तयोरंडानि
निदधुःप्रहृष्टाःपरिचारिकाः सोपस्वेदेषुभांडेषुपंचवर्षशतानिच १४ ततःपंचशतेकालेकद्रूपुत्राविनिसृताः अंडाभ्यांविनतायास्तुमिथुनंनव्यदृश्यत १५

यथाश्रुतंयथाश्रुतानवनवतिःतयादशशतादशशतानिःशतमित्यर्थः दशदशतीःदशशतानीत्यर्थः १३ सोपस्वेदेषुउष्मवत्सु तत्रह्यंडांतर्जलंउष्मणाशीघ्रंघनीभवतीति
१४ पंचशतेपंचशत्याःपूरणेकालेसंवत्सरेपूर्णेसतीतिशेषः मिथुनंनिःसृतंसत्तनव्यदृश्यत नदृष्टस्वरूपेणेतिशेषः १५ ० ० ० ०

व्रीडितासमत्याःपुत्रसमृद्ध्याऽलज्जिताऽपश्यतऽपश्यत् १६ अध्यर्द्धेति चरणादारभ्यऽर्द्धाऽपरिपूर्त्तनेनदेहनकृत्स्नइत्यर्थः पूर्वार्द्धेतिपाठःसुगमः क्रोधसंरब्धःक्रोधेनद्वेषेणसंरब्धोऽभिनिविष्टः १७ १८ १९ अनंगंमाभिव।व्यंगंअदृढावयववा २० प्रतिपालयितव्यःप्रतीक्षणीयः २१ २२ २३ भर्तृशुश्रूषयैवनारीणांमनोरथसिद्धिः ईर्ष्य

ततःपुत्रार्थिनीदेवीव्रीडितावतपस्विनी अंडविभेदविनतातत्रपुत्रमपश्यत १६ पूर्वार्द्धकायसंपन्नमितरेणाप्रकाशिता सपुत्रःक्रोधसंरब्धःशशापैनामिति श्रुतिः १७ योहमेवंकृतोमातस्त्वयालोभपरीतया शरीरेणासमग्रेणतस्माद्दासीभविष्यसि १८ पंचवर्षशतान्यस्याययाविसर्द्धसेसह एषचत्वांसकृतो मातर्दासीत्वंमोचयिष्यति १९ यद्येनमपिमातस्त्वमभिवांडविभेदनात् नकरिष्यस्यनंगंवाव्यंगंवापितपस्विनं २० प्रतिपालयितव्यस्तेजन्मकालो स्युधीरया विशिष्टबलमीप्स्यत्यापंचवर्षशतात्परः २१ पुरंशक्रातातःपुत्रोविनतामंतरिक्षगः अरुणोदृश्यतेब्रह्मन्प्रभातसमयेसदा २२ आ दित्यरथमध्यास्तेसारथ्यंसमकल्पयत् गरुडोपियथाकालंजनेसपन्नगभोजनः २३ सजातमात्रोविनतांपरित्यज्यखमाविशत् आदास्यन्नात्मनो भोज्यमन्नंविहितमस्ययत् विधात्राभृगुशार्दूलक्षुधितःपन्नगेश्वरः २४ इत्यादिपर्व्याख्यातेपंचदशोध्यायः सौतिरुवाच एतस्मिन्नेवकाले तुभगिन्यौतेतपोधन अपश्यतांसमायांतमुच्चैःश्रवसमंतकात् १ यंतंदेवगणाःसर्वेहृष्टरूपमपूजयन् मथ्यमानेऽमृतेजातमश्वरत्नमनुत्तमं २ अमोघबलमश्वानामुत्तमंजयतांवरं श्रीमंतमजरंदिव्यंसर्वलक्षणपूजितं ३ शौनकउवाच कथंतदमृतंदेवैर्मथितंकस्यहेतवे यत्रोच्चैःश्रवाजज्ञेमहावीर्यः सोश्वराजोमहाद्युतिः ४ सौतिरुवाच ज्वलंतमचलंमेरुंतेजोराशिमनुत्तमं आक्षिपंतंप्रभाभानोःस्वशृंगैःकांचनोज्वलैः ५

यावत्सिद्धमपिकरंहीयतइत्याध्या

यतासर्वं विधात्राविहितमितियोजना अध्यायः एतस्मिन्निति समयातेएकीभूते १ ४ ज्वलंतंमेरुंसमागम्यदिवौकसःअमृतायमंत्रयितुमारब्धाइतिषष्ठेनान्वयः किंरुवातस्य

मेरोःशृंगंउपारुह्येतिसंबंधः ५ अप्रमेयंअतिमनोहरत्वात्मनसावाचावाःकालयितुमशक्यं ६ आचरितंअवीर्ण ७ अगम्यंअप्राप्तंअन्यैःप्राकृतैः ८ अनंतकल्पं अनंतोविष्णुराकाशोवाततईषन्यूनं बहुगुणाद्यत्वादतिप्रमाणत्वाच्च ईषदसमाप्तोकल्पप् उद्दिष्टंउच्चं ९ ११ कलशइवकलशोमंथनाधारत्वात्उदधिःसमुद्रः कल

कनकाभरणंचित्रंदेवगंधर्वसेवितं अप्रमेयमनाधृष्यमधर्मबहुलैर्जनैः ६ व्यालैराचरितंघोरैर्दीप्तौषधिविराजितं नाकमारुह्यतिष्ठतमुच्चैरेणमहागिरिं ७ अगम्यंमनसाप्यन्यैर्नदीरत्नसमन्वितं नानाविहगसंघैश्चनादितंरुचिरद्रुमैः ८ तस्यशृंगमुपारुह्यबहुरत्नान्वितंशुभं अनंतकल्पमुद्दिष्टंसुराःसर्वेमहौ जसः ९ तेमंत्रयितुमारब्धास्तत्रासीनादिवौकसः अमृतायसमागम्यतपोनियमसंयुताः १० तत्रनारायणोदेवोब्रह्माणमिदमब्रवीत् चिंतयत्कस्य रेष्वेवंमंत्रयत्कृतसर्वशः ११ देवैरसुरसंघैश्चमथ्यतांकलशोदधिः भविष्यत्यमृतंतत्रमथ्यमानेमहोदधौ १२ सर्वौषधीःसमावाप्यसर्वरत्नानिचैवह मंथध्वमुदधिंदेवावित्यध्वमभृतंततः १३ इत्यादिपर्वण्यमृतमथनेषोडशोध्यायः सौतिरुवाच ततोश्वाशिरवराकारैर्गिरिशृंगैरलंकृतं मंद रंपर्वतवरंलताजालसमाकुलं १ नानाविहगसंघुष्टंनानाद्रिसमाकुलं किंनरैरप्सरोभिश्चदेवैरपिचसेवितं २ एकादशसहस्राणियोजनानांस मुच्छ्रितं अधोभूमेःसहस्रेषुतावत्स्वेवप्रतिष्ठितं ३ समुद्धर्तुमशक्यंवैसर्वैर्देवगणास्तदा विष्णुमासीनमभ्येत्यब्रह्माणंचेदमब्रुवन् ४

क्षीरोदधिःक्षीरसमुद्रइतिकेचित् कलाःपाषाणमयाःपर्वताःमैनाकादयःशेरतेस्मिन्नितिकलशाःसमुद्रः सचोदधिरुदकानधीयतेस्मिन्नितियोगाज्जलसमुद्रइत्यर्थः विशेषणं विशेष्येणबहुलइतिसमासः कलशशब्दोदृषदिरूढोलोटेषु।क्षीभ्यतांकलशाःसर्वैरितिवाक्यशेषात् आर्षत्वसिद्धभावेश्लेषप्रसिद्धापिअर्थनिर्णयाभ्युपगमात् १२ वे त्स्यथेलप्स्यथे १३ अध्यायः ततइति १ ४

६ अनंतःशेषः ७ पर्वतराजानं अमित्यत्वात्समासांतष्टच् सवनंसूतेनेनेतिअमृतप्रसवसाधनंवनैःसहितंवा ८ तेनपर्वतेनहृताःनंतेनतंसमुद्रमूचुः जलंतवेतिशेषः ९ १० अकूपारंसमुद्रसमीपे हितायांतपोऽउपेक्ष्येत्यर्थाहारः अधिष्ठानं गौरवात्तलंजिगमिषतोमंदरस्याधारः ११ १२ मंथानंमंथनदंडं नेत्रंमथनरज्जुं १३ एकमंतं

भवंतावत्रकुरुतांबुद्धेनैःश्रेयसीपरां मंदरोद्धरणेयत्नःक्रियतांवहितायनः ५ तथेतिचाब्रवीद्विष्णुर्ब्रह्मणासहभार्गव अचोदयदमेयात्माफणींद्रंपन्न लोचनः ६ ततोनंतःसमुत्थायब्रह्मणापरिनोदितः नारायणेनचायुक्तस्तस्मिन्कर्मणिवीर्यवान् ७ अथपर्वतराजानंतमनंतोमहाबलः उज्जहारबलाद्ब्रह्मन्सवनंसवनौकसं ८ ततस्तेनसुराःसार्द्धं दैत्याःसमुपतस्थिरे तमूचुरमृतस्यार्थेनिर्मथिष्यामहेवयं ९ अथापतिरथोवाचममाप्यंशोभवेन्न तः सोदास्मिविपुलंमंदंमंदरंभ्रमणादिति १० ऊचुश्चकूर्मराजानमकूपारसुरासुराः अधिष्ठानंगिरेरस्यभवानूभवितुमर्हति ११ कूर्मेणतुतथेत्युक्त्वा पृष्ठमस्यसमर्पितं तंशैलंतस्यपृष्ठस्थेयंत्रेणेंद्रोन्यपीडयत् १२ मंथानंमंदरंकृत्वातथानेत्रंचवासुकिं देवामथितुमारब्धाःसमुद्रंनिधिमंभसां १३ अमृतार्थंततोब्रह्मन्सहितादितिदानवाः एकमंतमुपाश्लिष्टानागराजोमहासुराः विबुधाःसहिताःसर्वेयतःपुच्छंततःस्थिताः १४ अनंतोभ गवान्देवोयतोनारायणस्ततः शिरउत्क्षिप्यनागस्यपुनःपुनरवाक्षिपत् १५ वासुकेरथनागस्यसहस्राक्षिप्यतःसुरैः सधूमार्चिषोवाताविष्वेनुरस

रुन्मुखात् १६

एकदेशंमुखभागं उपाश्लिष्टाःदृढंधृतवंतः १४ अनंतइतिशेषोविष्णुपक्षीयः वासुकेःशिरउत्क्षिप्योत्क्षिप्य भूमावाक्षिपन्तन्मुखनिःसृतंविषंसयंसोऽवानिलभावः १५ वासुकिमुखोत्थंवाद्यादिदेवोपकारायाभूदित्याह वासुकेरितिद्वाभ्यां आक्षिपतःआक्षिप्यमाणस्य एतेनमेघस्यधूमज्योतिर्वातवारिमयत्वमुक्तं १६ ॥

१७ १९ जलचराःमत्स्यादयः अस्मदादिवत्सार्थिवांशप्रधानशरीराः २० वारुणानिवरुणलोकस्थानिअप्पांशदेहप्रधानदेहानि २१ पर्वतात्तनमानानांद्रुमाणां संघर्षाज्जातोग्निःपर्वतंव्याप्नुवन्तत्रस्थान्यन्यादीनूददहित्याहत्रिभिः तस्मिन्निसादिभिः २२ २३ २४ २६ तेषांद्रुमौषधीनांयेऽमृतवीर्याःरसास्तज्ज्ञै

तेधूमसंघाःसंभूतामेघसंघाःसविद्युतः अभ्यवर्षन्सुरगणानूधूमसंतापकर्षितान् १७ तस्माच्चगिरिकूटाग्रात्पतिताःपुष्पवृष्टयः सुरासुरग णान्सर्वानूसमंतात्समवाकिरन् १८ बभूवात्रमहानादोमहामेघरवोपमः उदधेर्मथ्यमानस्यमंदरेणसुरासुरैः १९ तत्रनानाजलचराविनिष्पि ष्टामहाद्रिणा विलयंसमुपाजग्मुःशतशोऽवणांभसि २० वारुणानिचभूतानिविविधानिमहीधरः पातालतलवासीनि विलयंसमुपानयत् २१ तस्मिंश्चाभ्यर्णदेशंघृष्यतःपरस्परं न्यपतन्पतगेपेताःपर्वताग्रान्महाद्रुमाः २२ तेषांसंघर्षजश्चाग्निरर्चिभिःप्रज्वलन्मुहुः विद्युद्भिरिवनी लाभ्रमारुणोन्मंदरंगिरिं २३ ददाहकुंजरांस्तत्रसिंहाश्चैवविनिर्गतान् विगतासूनिसर्वाणिसत्वानिविविधानिच २४ तमग्निममरश्रेष्ठःप्रदहं तमितस्ततः वारिणामेघजेनेंद्रःशमयामाससर्वशः २५ ततोनानाविधास्तत्रस्रुवुःसागरांभसि महाद्रुमाणांनिर्यासाबहवश्चौषधीरसाः २६ तेषाममृतवीर्याणांरसानांपयसैवच अमरत्वंसुराजग्मुःकांचनस्यचनिःस्रवात् २७ ततस्तस्यसमुद्रस्यतज्जातमुदकंपयः रसोत्तमैर्विभिश्चैवततः क्षीरादभूद्घृतं २८ ततोब्रह्मणमासीनंदेवावरदमब्रुवन् श्रांताःस्मसुदृशंब्रह्मन्नोऽद्यवत्स्यमृतंवतत् २९

नपयसाक्षीरिणकांचनस्यस्वर्णमयस्यपर्वतस्यनिः स्रवात्दिव्यप्रभावानेकमणिभ्योनिःसृताज्जलाच्च सुराश्चामृतत्वंजग्मुः २७ ततःपयोनिःस्रवंप्राप्यसमुद्रस्यतत्क्षारंउदकंलवणांभसीत्यपक्रमात् पयःक्षीरं जातं यथाक्षारमक्षारंवाजलंगवादिक्षीरसंप्राप्यक्षीरभवतितद्वदित्यर्थः पयोपिरसोत्तमैर्विभिस्तमिलिततोहेतोः क्षीरादभूद्घृतं २८ २९ श्रीरामचंद्र

३० ३२ शतसहस्रंलक्षंअनंताअंशवोअस्यायनीयौषधिभेदाइमयोयस्यसशतसहस्रांशुः शतसहस्रांतदृतिपाठेंऽतशद्वोगम्यप्रदेशापरः ३४ घृतेनद्यावाष्ट
थिवीलुधीतिपार्जन्येदर्शनान्नेयंदुकूलसिद्धेश्चघृतंजलंतस्मात्क्षीरोदस्यक्षीरवंततोघृतमितिकर्मधारयमात्रं ३५ मरीचिविकचः रश्मि

विनानारायणंदेवंसर्वेन्येदेवदानवाः चिरारब्धमिदंवापिसागरस्यापिमंथनं ३० ततोनारायणंदेवंब्रह्मावचनमब्रवीत् विधत्स्वैषांबलंविष्णोभवान
त्परायणं ३१ विष्णुरुवाच बलंददामिसर्वेषांकर्मैतद्येसमास्थिताः क्षीभ्यतांकलशःसर्वैर्मंदरः परिवर्त्यतां ३२ सौतिरुवाच नारायणवचःश्रुता
बलिनस्तेमहोदधेः तयवःसहिताभूयश्चक्रिरेभृशमाकुले ३३ ततःशतसहस्रांशुर्मथ्यमानानुसागरात् प्रसन्नात्मासमुत्पन्नः सोमःशीतांशु
रुज्वलः ३४ श्रीरनंतरमुत्पन्नाघृतासांदुग्धसिनी सुरादेवीसमुत्पन्नातुरगःपांडुरस्तथा ३५ कौस्तुभस्तुमणिर्दिव्यउत्पन्नोघृतसंभवः मरी
चिविकचःश्रीमान्नारायणउरोगतः ३६ श्रीसुराचैवसोमश्चतुरगश्चमनोजवः यतोदेवास्ततोजग्मुरादित्यपथमाश्रिताः ३७ धन्वंतरिस्ततो
देवोवपुष्मानुदतिष्ठत श्वेतंकमंडलुंबिभ्रदमृतंयत्रतिष्ठति ३८ एतदत्यद्भुतंदृष्ट्वादानवानांसमुत्थितः अमृतार्थेमहान्नादोममेदृतिजल्प
तां ३९ श्वेतैर्दंतैश्चतुर्भिस्तुमहाकायस्ततःपरं ऐरावणोमहानागोभवद्वज्रभृताधृतः ४० अतिनिर्मथनादेवकालकूटस्तथापरः जगदा
ह्लासहसासधूमोग्निरवज्वलन् ४१ त्रैलोक्यंमोहितंतस्यगंधमाघ्रायतद्विषं प्रायसल्लोकरक्षार्थेब्रह्मणोवचनोद्भवः ४२ ६

भिरुज्वलः नारायणउरोगतइत्यसंधिरार्षः ३६ ३७ ३८ ३९ ऐरावणऐरावतःमहानागोमहाहस्ती ४० ४१ ४२ ६ ६ ६

निराशाःविषमयैतैर्गृहीतंअस्माभिस्तद्ग्रहणासमर्थैःकथममृतंलप्स्यामहेतिभावः महानूत्रंतःसंहारोयेनतन्महांतं ४४ अभिसंश्रितःसंमुखःमोहनार्थ
मित्यर्थः ४५ अमृतादपिक्षिप्तैराःसंगमाविणयोपिता दधतामोहिनीरूपंहरिणैवशकारितमितिरत्नगर्भः ४६ अध्यायः आवरणसुरक्षानिकवचाख्यानि

ध्यारनगवान्कंठेमंत्रमूर्तिर्महेश्वरः तदाप्रभृतिदेवस्यनीलकंठइतिश्रुतिः ४३ एतन्महदुतंदृष्ट्वानिराशादानवर्षिताः अमृतार्थेबलस्यार्थेमहांतं
वैरमाश्रिताः ४४ ततोनारायणोमायांमोहिनीसमुपाश्रितः स्त्रीरूपमद्भुतंहृद्यादानवानभिसंश्रितः ४५ ततस्तदमृततस्यैदनुस्तेमूढचेतसः
स्त्रियेदानवदेतेया सर्वेतदृतमानसाः ४६ इत्यादिपर्वण्यमृतमथनेसप्तदशोध्यायः सौतिरुवाच अथावरणसुरक्षानिनानाप्रहरणानि
च घृत्वान्यदवन्देवासहितादैत्यदानवाः १ ततस्तदमृतंदेवोविष्णुरादायवीर्यवान् जहारदानवेंद्रेभ्योनरेणसहितःप्रभुः २ ततोदेवगणाः
सर्वेपपुस्तदमृतंतदा विष्णोःसकाशात्संप्राप्यसंभ्रमेतुमुलेसति ३ ततःपिबत्सुतत्कालंदेवेष्वमृतमीप्सितं राङ्गर्वुधरूपेणदानवः प्रापि
बतदा ४ तस्यकंठमनुप्राप्तेदानवस्यामृतेतदा आख्यातचंद्रसूर्याभ्यांसुराणांहितकाम्यया ५ ततोभगवतातस्यशिरश्छिन्नमलंकृतं च
कायुधेनचक्रेणपिबतोमृतमोजसा ६ तच्छिरश्चंद्रसंकाशंदानवस्यशिरोमहत् चक्रछिन्नंखमुत्पत्यननादातिभयंकरं ७ तत्कबंधंपपातास्य
विस्फुरद्दर्शणीतले सपर्वतवनद्वीपांदैत्यस्यात्रंपयन्मही ८ ततोवैरविनिर्वेधः रुतोराहुरवेनवै शाश्वतश्चंद्रसूर्याभ्यांग्रसत्यद्यापिचैवतौ ९

प्रहरणानिच्यायुधानि १ २ संभ्रमउभयेषाममृतादरेसति २ ४ ५ ६ ७ ८ ९ ओन्मोभगवतेवासुदेवायनमः श्रीगोपालकृष्णायनमः

१० ११ प्रासाःहस्तक्षेप्याःस्फटभल्लाःविध्येकरकाडीतिप्रसिद्धाः तोमराःदीर्घदंडास्तएवाक्षेप्याःलांगलिधराद्तिप्रसिद्धाः विविधानिशस्त्राणियमदंष्ट्रादीनिलो
कप्रसिद्धानिजमधउद्यादीनि १२ असिःखड्गः शक्तिःहस्तक्षेपोलोहदंडःपृथुबुध्नःगदासरलःसएव १३ पट्टिशःखड्गविशेषः उभयतोधारस्तीक्ष्णाग्रः

विहायभगवांश्चापिस्त्रीरूपमतुलंहरिः नानाप्रहरणैर्भीमैर्दानवान्समकंपयत् १० ततःप्रवृत्तःसंग्रामःसमीपेलवणोदस्यः शस्त्राणामस्त्राणां
चसर्वघोरतमोमहान् ११ प्रासाश्चविपुलास्तीक्ष्णान्यपतंतसहस्रशः तोमराश्चसकृतीक्ष्णाग्राःशस्त्राणिविविधानिच १२ ततोस्त्राश्चक्रमि
त्रावमंतोरुधिरवहं असिशक्तिगदारुग्णानिपेतुर्धरणीतले १३ छिन्नानिपट्टिशैश्चैवशिरांसिचयुधिदारुणैः तत्रकांचनमालीनिनिपेतुरनिशं
तदा १४ रुधिरेणावलिप्तांगानिहताश्चमहासुराः अदीर्णामिवकूजंतोधातुरक्तानिरेरते १५ हाहाकारःसमभवत्तत्रतत्रसहस्रशः अन्योन्यं
छिंदतांशस्त्रैरादित्येलोहितायति १६ परिघैरायसैस्तीक्ष्णैःसन्निकर्षेचमुष्टिभिः निघ्नतांसमरेन्योन्यंशब्दोदिवमिवास्पृशत् १७ छिंधिभिंधि
त्रधावतंपातयाभिसरेतिच व्यश्रूयंतमहाघोराःशब्दास्तत्रसमंततः १८ एवंप्रवृत्तेयुद्धेवर्त्तमानेमहाभये नरनारायणौदेवौसमाजग्मतुरा
हवं १९ तत्रदिव्यधनुर्दृष्ट्वानरस्यभगवानपि चिंतयामासतच्चक्रंविष्णुर्दानवसूदनः २० ततोंबराच्चोतितमात्रमागतंमहाप्रभंचक्रमिवत्रि
पथं विभावसोस्तुल्यमकुंठमंडलंसुदर्शनंसंयतिभीमदर्शनं २१ तदागतंज्वलितकृतानलप्रभंभयंकरंकरिकरबाहुरच्युतः सुमोचवैप्रबल
वद्ग्रवेगवान्महाप्रभंपरनगरावदारणं २२

पट्टाद्तिप्रसिद्धः १४ १५ १६ परिघःपरिलोहनीतितथासर्वतः कंटाकितोलोहदंडः एवमग्रेपिश्लोकेप्रसि राम
द्धानुसारणयोगबलेनचायुधवाचिनाशब्दानामर्थोबोध्यः १७ १८ १९ २० २१ २२ ७० ७० ७० ७० ७०

२३ प्रवेरितंवेरिवधं अवोपसर्गस्यभागुरिमतेनाकारलोपः २४ विगलिताःरिक्ताःमेघास्तुल्यदीप्तयःश्वेतभास्वराइत्यर्थः २५ बहुविधानीलपीतादिधातु
मत्वात् मेघरूपिवंगगनगामित्वात् २६ गणशब्दिताःरुद्रानुचरोपलक्षितादेवाः असुराश्चगणाश्चतेषांविग्रहे गणःप्रमथसंघोघेइतिमेदिनी २८ निशाम्य

तदंतकज्वलनसमानवर्चसंपुनःपुनर्व्यपततवेगवत्तदा विदारयद्क्षितिरनुजासहस्रशोमुहुःक्षितौतथापौरुणेरुधिरमथोपिशाचवत् २७
तथासुराःशिरोभिरदीनचेतसोमुहुर्मुहुःसुरगणमार्दयंस्तदा महाबलाविगलितमेघवर्चसःसहस्रशोगगनमभिप्रपद्यह २५ अथांबराद्
यजननाःप्रपेदिरेसपादपाब्दविधमेघरूपिणः महाद्रयःपरिगलितायसानवःपरस्परंद्रुतमभिहत्यसस्वनाः २६ ४ करिरंपुरुषवरेणसं
युगे २३ दहन्नविज्वलनइवावलेलिहन्प्रसंस्तुतानसुरगणान्व्यलुंठत प्रवेरितंवयतिस्म ततोमहीप्रविचलितासकाननाभहाद्रिपाताभि
हतासमंततः परस्परंभृशमभिगर्जतांमुहुरणाजिरेभृशमभिसंप्रवर्तिते २७ नरस्ततोवरकनकाग्रभूषणैर्महेषुभिर्गगनपथंसमावृणोत्
विदारयन्निरिशिखराणिपत्रिभिर्महाभयेःसुरगणवियद्गतान् २८ ततोमहीलवणजलंवसागरंमहासुराःप्रविविशुरर्दिताःसुरैः वियद्गतंच्च
परि लितकृतानलप्रभंसुदर्शनंप्रकुपितंनिरस्यते २९ ततःसुरैर्विजयमवाप्यमंदरःस्वमेवदेशंगमितःसुपूजितः विनाघसंस्थितमपिचैवसर्वशस्ततो
गताःसलिलधरायथागतं २० ततोऽमृतंसुहितमेकचक्रिरेसुराःपरांमुदमभिगम्यपुष्कलां ददौचतांनिधिममृतस्यरक्षितुंकरीटिनेबलभिदथा
मरैःसह २१ इत्यादिपर्वण्यमृतमंथनंसमाप्तं ७

विज्ञाय तेऽसुराः २९ सलिलधराःअमृतभृतोदेवाः ३० किरीटिनेनराय २१ तुल्यायासेत्यावबुधानाब्जिनंविमुखाहरेः देवास्तवरागविमोःप्रपूरतदिहो
च्यते २१ इतिश्रीमत्सदाक्यप्रमाणमर्यादाधुरंधरचतुर्धरवंशावतंस०नीलकंठस्यकृतौभारतभावदीपेअमृतमथनंसमाप्तं ६ ६

विपणावहेपणंकुर्वहे २ दिव्य विजिगीषास्व दासीभावायमोवादासीकर्नुंतेवादासीभवितुंब्रूहीत्यर्थः ४ ५ जित्मंकौटिल्यं ६ नावपद्यतेनानुमोदितवं

सौतिरुवाच एतन्नेकथितंसर्वममृतंमथितंयया यत्रसोश्वःसमुत्पन्नःश्रीमानतुलविक्रमः १ यंनिशम्यतदाकद्रूर्विनतामिदमब्रवीत् उच्चैःश्रवा हिकिंवर्णोभद्रेप्रब्रूहिमाचिरं २ विनतोवाच श्वेतएवाश्वराजोयंकिंवात्वमन्यसेशुभे ब्रूहिवर्णंतमप्यस्यततोत्रविपणाहवे ३ कद्रुरुवाच कृष्ण वालमहंमन्येहयमेनंसुविस्मिते एहिसार्द्धमयादिव्यदासीभावायभामिनि ४ सौतिरुवाच एवंतेसमयंकृत्वादासीभावायवैमिथः जग्मतुःस्व गृहानेवश्वोद्दश्यावशंतस्मह ५ ततःपुत्रसहस्रंतुकद्रूर्जिह्मंचिकीर्षती आज्ञापयामासतदावालाभूत्वांजनप्रभाः ६ आविशाध्वंहयंक्षिप्रं दासीनस्यामहंयया नावपद्यतयेवाक्यंतानूशशापभुजगमान् ७ सर्पसत्रेवर्तमानेपावकोवःप्रधक्ष्यति जनमेजयस्यराजर्षेःपांडवेयस्यधीम तः ८ शापमेनंतुशुश्रावस्वयमेवपितामहः अतिक्रूरंसमुत्सृष्टंकद्र्वादेवादनीवहि ९ सार्द्धंदेवगणैःसर्वैःवावंतामन्वमोदत वडूत्पन्नेभ्यस र्पाणांप्रजानांहितकाम्यया १० तीक्ष्णवीर्यविषाह्येतेदंदशूकामहाबलाः तेषांतीक्ष्णविषत्वाद्धिप्रजानांचहिताय च ११ युक्तमात्माकृतंतेषांपर पीडोपसर्पिणां अन्यषामपिसत्वानांनित्यदोषापरास्तथे १२ तेषांप्राणांतिकोदंडोदैवेनविनिपात्यते एवंसञ्चिन्त्यदेवस्तूज्यकद्रूंचतांतदा १३ आहूयकश्यपोदेवइदंवचनमब्रवीत् यदेतेदंदशूकाश्चसर्पाजातास्त्वयानघ १४ विषोल्बणामहाभोगामात्माशत्रूःपरंतप तत्रमन्यु स्त्वयातातनकर्तव्यःकथंचन १५ दृष्टपुरातनंह्येतद्यज्ञेसर्पविनाशनं इत्युक्तास्रष्टिकृद्देवस्तप्रसाद्यप्रजापतिं त्रादाद्विषहरींविद्यांकश्यपा यमहात्मने १६ इत्यादिपर्वणिसौपर्णे ७

तः ७ ८ ९ १० दंदशूकाः भृशंदंशनशीलाः ११ १२ १३ १४ महाभोगाःमहाशरीराः १५ विषहरींविषघ्नीं विषहरामितिपाठः १६ अध्यायः ६



राम ७१

व्युष्टायांरात्रीनायां १ दास्येविषये २ उदकेनअगाधंतलस्पर्शशून्यं क्षोभ्यमाणंमकरादिभिः २ ६ पातालज्वलनोवाडवाग्निस्तस्यावासं बांधवंशरणं बं धनमितिपीठकारागारं ७ ८ ९ वेलायाःदोलआंदोलनंतज्जनानिलेनचलं १० ११ गांपृथिवींविंदतालभमानेनहेतोरादृत्प्रत्ययः तेनहेतुनाविक्षोभितेन

सौतिरुवाच ततोरजन्यांव्युष्टायांप्रभातेरुदितेरवौ कद्रूश्चविनतावैवभगिन्यौतेतपोधन १ श्रमार्षितेसुसंरब्धेदास्येकृतपणेतदा जग्मतुस्तरसंह ष्टेसुतैःश्रवसमंतिकात् २ दद्दशातेऽथतेतत्रसमुद्रंनिधिमंभसां महांतमुदकागाधंक्षोभ्यमाणंमहास्वनं ३ तिमिंगिलझषाकीर्णमकरैराकुलंत था सत्वैश्चबहुसाहस्रैर्नानारूपैःसमावृतं ४ भीषणैर्विकृतैरन्यैर्घोरैर्जलचरैस्तथा उग्रैर्नित्यमनाधृष्यंकूर्मग्राहसमाकुलं ५ अक्षोभ्यंसर्वरत्ना नामाकरंवरुणस्यच नानानामालयंरम्यमुत्तमंसरितांपतिं ६ पातालज्वलनावासमसुराणांचबांधवं भयंकरंचसत्वानांपयसांनिधिम र्णवं ७ शुभंदिव्यममर्त्यानामकृतस्याकरंपरं अप्रमेयमचिंत्यंचक्षुष्यजलमद्भुतं ८ घोरंजलचराराववेगोद्वेगैरवान्वितं स्वनं गंभीरावर्तकालोलं सर्वभूतभयंकरं ९ वेलादोलाकिलचलंशोभोद्वेगसमुत्थितं वीचीहस्तैःप्रचलितैःनृत्यंतमिवसर्वतः १० चंद्रवृद्धिक्षयवशादुद्वृत्तोर्मिसमाकुलं पांचजन्यस्यजननंरत्नाकरमनुत्तमं ११ गांविंदताभगवतागोविंदेनामितौजसा वराहरूपिणाचांतर्विक्षोभितजलाविलं १२ ब्रह्मर्षिणाच तप्ततावर्षाणांशतमग्निना अनासादितगाधंचपातालतलमव्ययं १३ अध्यात्मयोगनिद्रांवपद्मनाभस्यसेवतः युगादिकालशयनंविशाल मितेजसः १४

अलेनाविलंव्याप्तं १२ अग्निणातप्तानेषणेतिशेषः गाधंतलं पातालस्याप्यतलंयद्यधस्तं अव्ययंपातालादिप्रलयेप्यविनाशं १३ सेवतःसेवमानस्ययुगादिका लशयनं युगांतरुताद्यंतस्यस्मारिभूतःयुगादिकालः तस्मिन्शयनंतल्पभूतं १४ श्रीरामजयरामजयजयराम ६ ६ ६ ६

डिंबाहवेडिंबोभयवानमाक्रंदःतद्वतिआहवे डिंबोभयध्वनावंडेरितमेदिनी तिग्माहवइतिपाठःस्पष्टार्थः १५ वडवाअश्वातस्यामुखावउन्मोदीन्नोयोग्निस्तस्मैतोयहव्यप्रदं
गाधःपारश्चनास्तियस्यसोऽगाधपारस्तं अतएवविस्तीर्णविशेषणस्तीर्णसमंततःआस्तीर्णं १६ अभिसार्यमाणंअभितोगम्यमानं १७ तेकदूविनते अगाधंपूर्वरूपमा

वज्रपातनसंत्रस्तैर्नागैराकुल्याभयप्रदं डिंबाहवादितानांचअसुराणांपरायणं १५ वडवामुखवदीप्ताग्निस्तोयहव्यप्रदंशिवं अगाधपारविस्तीर्णमप्रमेयंस
रितं १६ महानदीभिर्बद्धाभिःस्वर्द्दृश्यवसहस्रशः अभिसार्यमाणमनिशंददृशातेमहार्णवं आपूर्यमाणमत्यर्थंनृत्यमानमिवोर्मिभिः १७ गभीरंति
मिमकरोग्रसंकुलंतंगर्जंतंजलवरारावरौद्रनादैः विस्तीर्णंददृशतुरंबरप्रकाशंतेगाधंनिधिमुरुमंभसामनंतं १८ इत्यादिपर्वणिसौपर्णे ७ सौ
तिरुवाच नागाश्वसंविदंकृत्वाकर्तव्यमितितद्वचः निःस्नेहाविदहेमाताअसंप्राप्तमनोरथा १ प्रसन्नामोक्षयेदस्मांस्तस्माच्चापाच्चभाविनी क्षमपुत्रं
करिष्यामस्करगस्यनसंशयः २ तथाहिगत्वातितस्यपुरोबालाऋतिस्मृताः एतस्मिन्नंतरेतेनुसपत्न्योपणितेनदा ३ ततस्तेपणितंकृत्वाभगिन्यो
द्विजसत्तम जग्मतुःपरयाप्रीत्यापरंपारंमहोदधेः ४ कद्रूश्चविनताचैवदाक्षायण्योविहायसा आलोकयंत्यावसोभ्यंसमुदंनिधिमंभसां ५ वा
युनातीवसहसासोभ्यमाणंमहास्वनं तिमिंगिलसमाकीर्णमकरैराकृतंतथा ६ संयुतंबडवाभास्त्रैःसत्त्वैर्नानाविधैरपि घोरैर्घोरमनाधृष्यंगभी
रमतिभैरवं ७ आकरंसर्वरत्नानामालयंवरुणस्यच नागानामालयंचापिकरभ्यंसरितांपतिं ८ ० ० ०

र्व १८ अध्यायः संविदंमिथआलोचनं पणिते पणकृतवत्यौ ३ ४ उक्तानुक्तविशेषणैः पुनःस्तौति अक्षोभ्यमित्यादिना ५ ६ ७ ८ श्रीरामचंद्रायनमः

९ १० ११ १२ इत्यादिपर्वण्यध्यायः शशांककिरणवत्प्रख्यादीप्तिर्यस्यतंनादृशमपिकालवालंकृष्णकेशं २ निशाम्यदृष्ट्वा ३ ४ ५ कामरूपः इष्टरूपमेव

पातालज्वलनाभासमभक्षाणांतथालयं नयंकराणांसत्वानांपयसोनिधिमव्ययं ९ शुभंदिव्यममर्त्यानाममृतस्याकरंपरं अप्रमेयमचिंत्यंचपुण्यजलसं
मितं १० महानदीभिर्बद्धाभिस्तत्रतत्रसहस्रशः आपूर्यमाणमत्यर्थंनृत्यंतमिवोर्मिभिः ११ इत्येवंतरलतरोर्मिसंकुलंतंगभीरंविकसितमंबरप्र
काशं पातालज्वलनशिखाविदीपितांगंगर्जंतंद्रुतमभिजग्मतुस्ततस्ते १२ इत्यादिपर्वणिसौपर्णेसमुद्रदर्शनंनाम सौतिरुवाच तंसमुद्दिश
तिक्रम्यकद्रुर्विनतयासह न्यपतन्नुरगाभ्यासेनाचिरादिवशीघ्रगा १ ततस्तेतंहयश्रेष्ठंददृशातेमहाजवं शशांककिरणप्रख्यंकालवालमुभेनदा २ नि
शाम्यचक्रुस्तान्पुष्टसमाश्रितान् विषण्णरूपांविनतांकद्रुर्दासेनियोजयत् ३ ततःसविनतातस्मिन्पणितेनपराजिता अभवद्दुःखसंतप्तादासीभा
वंसमाश्रिता ४ एतस्मिन्नंतरेचापिगरुडःकालआगते विनामातामहातेजाविदार्योडमजायत ५ महासत्वबलोपेतःसर्वाविद्योतयन्दिशः कालरूपः
कामगमःकामवीर्योविहंगमः ६ अग्निराशिरिवोद्भासन्सामिद्धोतिभयंकरः विद्युद्विस्पष्टपिंगाक्षोयुगांताग्निसमप्रभः ७ प्रवृद्धःमहसापक्षीमहा
कायोनभोगतः घोरोघोरस्वनोरौद्रोवह्निरौर्वइवापरः ८ तंदृष्ट्वाशरणंजग्मुर्देवाःसर्वविभावसुं प्राणपत्याद्रुवन्सूर्यंनमासीनंविश्वरूपिणं ९ अग्नेमा
त्रंपवर्द्धिष्ठाःकाश्चिन्नोनाधिधक्ष्यसि अग्नेरादित्यःकमहान्नामद्भुतवसर्पति १० अग्निरुवाच नैतदेवंयथायूयंमन्यध्वमसुरार्दनाः गरुडोबलवानेष
मतुल्यश्चतेजसा ११

रूपंमतथा ६ उद्भासनउत्कर्षणभासमानः ७ ओर्वःवाडवः ८ विभावसुंवाङ्कं ९ अग्नेमात्वमिति देवानांत्रसवर्णनमग्निगरुडयोरतिसादृश्यकथनार्थं १० ११

अत्रापिपूर्ववत्सूक्ष्मपर्णोपाधिकंब्रह्मैवस्तूयते नहिविष्णुवाहनेपक्षिमात्रेप्रकृताभिसर्वाणिविशेषणानिअजमासंगछंते इंद्रंमित्रंवरुणमग्निमाऊरयोदिव्यः ससुपर्णोगरुत्मा न् एकंसद्विप्राबहुधावदंत्यग्निंयमंमातरिश्वानमाऊरितिश्रुतेः इंद्रादिवऊपकरिणसदेवैकमुच्यतेतस्यवगमात् ऋषिःप्रणवरूपोमंत्रः मंत्राणांसर्वेषांदृष्टामधुछंदश्चा दिरूपोवा महाभागःकृत्स्नस्ययज्ञस्यभोक्ता देवोद्योतमानः पतगानांजीवपक्षिणामीश्वरः अतिशीघ्रगोवा तद्वावतोन्यानत्येतिशश्वदितिश्रुतेः प्रभुःचेतनाचेतनस्य

जातःपरमतेजस्वीविनतानंदवर्द्धनः तेजोराशिमिमंदृष्ट्वायुष्मान्मोहःसमाविशत् १२ नागसत्यकरश्चैवकाश्यपेयोमहाबलः देवानांचहितेयुक्तस्त्वहितोदै त्यरक्षसां १३ नभीःकार्याकथंचात्रपश्यध्वंसहितामम एवमुक्तास्तदागत्वागरुडंवाग्भिरस्तुवन् १४ तेदृष्ट्वादेवमुपेत्यैनंदेवाःसर्षिगणास्तदा देवाऊचुः त्वंमृषिस्त्वंमहाभागस्त्वंदेवःपतगेश्वरः त्वंप्रभुस्तपनःसूर्यःपरमेष्ठीप्रजापतिः १५ त्वमिंद्रस्त्वंहयमुखस्त्वंशारस्त्वंजगत्पतिः त्वंमुखेपद्मजोविप्रस्त्वमग्निः पवनस्तथा १६ त्वंहिधाताविधातात्वंविष्णुःसुरसत्तमः त्वंमहानभिभूःशश्वदमृतंत्वंमहद्यशाः १७ ० ० ०

कृत्स्नस्याधिष्ठिता तपनःतपतीतितपनः अंतकर्त्ता सूर्यःसूतेसूर्यः×इति× उत्सादकःउपादानमित्यर्थः परमेष्ठीहिरण्यगर्भरूपेण प्रजापतिःदक्षादिरूपेणचनिमि त्तमपीत्यर्थः १५ त्वंहयेदेवराजः हयमुखोहयग्रीववतारः त्वंशारःमहादेवस्त्रिपुरवधेबाणभूतोविष्णुः त्वंमुखेब्रह्मत्रिणोस्यमुखमासीदितिश्रुतेः पद्मजश्चतुर्मुखः विप्रोविज्ञानवान् अग्निर्वायुश्चेत्यादिसर्वदेवतात्मा १६ धाताविधिः विधातामायेतिभाग्यास्यातमेव विष्णुःव्यापकः सुरसत्तमःदेवेश्वरः महान्महत्तत्वं अभिभूः अ भितोभवतीत्यभिभूः अभिमानोहंकारइत्यर्थः शश्वत्सर्वदाअमृतंअविकृतं महद्यशाःतस्यनाममहद्यशइतिश्रुतेर्निर्गुणंब्रह्म १७ श्रीगोपालकृष्णायनमोनमः

त्वप्रभाःसूर्यादीनांतेजांसित्वंअभिप्रेतंवुद्धिवृत्तिः नाणंरसणं बलस्यपुण्यस्यऊर्मिमान्सागरः अतएवअदीनरजआदिनाःउपसर्गाणांसत्वंयस्यसः अतएवसमृद्धैरैश्वर्यंतद्वा न् ऊर्विषहोयुक्तः त्वतःस्तंनिर्गतंसर्वं अहीनकीर्तिपुण्यश्लोक अनागतादिवत्वमेव १८ उन्नमश्चिन्मात्रः चराचरंचेतनाचेतनंस्थावरजंगमंवा गभस्तिभिर्हस्तानैः भानुरिवाकिरणैः अवभासमेघादिज्ञानरूपेण यथोक्तं परागर्थप्रमेयेषुयाफलत्वेनसंमता संवित्सैवेहमेयोर्थविदांनोक्तिप्रमाणतइति भानुमतःसूर्यस्यअतकोस्त्रकः

त्वमुत्तमःसर्वमिदंचराचरंगभस्तिभिर्भानुरिवावभाससे समाक्षिपन्भानुमतःप्रभांमुहुस्त्वमंतकःसर्वमिदंधुवाध्रुवं १९ × त्वंप्रभास्त्वमभिप्रेतंत्वंतत्त्राण मनुत्तमं बलेोर्भिमान्क्षाधुरदीनसत्वःसमृद्धिमान्दुर्विषहस्त्वमेव त्वतःस्तंसर्वमहीनकीर्तिस्त्वनागतंचोपगतंचसर्वं १८ × दिवाकरःपरिकुपितोयथादहे त्प्रजाःक्षयाद्यथादहसिकृतांतानप्रभ भयंकरःप्रलयश्चाग्निरुत्थितोविनाशयन्युगपरिवर्त्तनांतकृत् २० खगेश्वरंशरणमुपागतावयंमहोजसंज्वलनसमा नवर्चसं तडित्प्रभंविधिमिरमभ्रगोचरंमहाबलंगरुडमुपेत्यखेचरं २१ परावरंवरदमजय्यविक्रमंतवौजसासर्वमिदंप्रतापितं जगत्प्रभोदीप्तरुचावर्चसातपाहिसर्वात्मकरान्महात्मनः २२ नयाचितानभसिवमानगामिनोविमानिताविपथगतिंप्रयांतिते ऋषेःकृतस्त्वमसिदयावतःप्रभोमहात्मनः खगवरकेयपत्यह २३ समाकुधःकुरुजगतांद्योपरांतमीश्वरप्रशमुपैहिपाहिनः महाशनिस्फुरितसमस्वनेननेतादृशोऽवरंत्रिदिवमियंचमेदिनी २४

ध्रुवाध्रुवंसराक्षरंप्रधानपुरुषात्मकं १९ युगपरिवर्त्तनंसहस्रकृत्वोजायमानंतस्यअतःतत्कर्त्ताकालस्यापिकालइत्यर्थः २० खगेश्वरंउपेत्यसमीपिगत्वावयंशरणमुपागता इतिसंबंधः २१ परावरंकारणंकार्यंच अजय्यःजेतुमशक्यःविक्रमोयस्यतं २२ विमानगामिनोदेवाः विमानिताःपराजिताः विपथगतिंहीनमार्गानुसृतिं २३ सःत्वंमाकुधः क्रोधंमाकार्षीः महाशनेःस्फुरितंतेनसमःतुल्यः स्वनःशब्दोयेन हिरण्यकशिपुरादिदैत्यःकृत्तराद्रपकृष्यते २४ श्रीरामजयरामजयजयरामश्रीगजानन

निर्गत्यतांसंक्षिप्यंक्रियतां अव्यवस्थितमितिछेदः व्याकुलमित्यर्थः २६ अध्यायः सरूपर्णः रूक्षतिव्याजेनदेवैर्बोधितःतेभ्यआत्मनःदेहंस्वरूपंकृत्वाप्रेष्यानुभूय
वसर्वभूताभयायसौम्योबभूवेत्यर्थः १ समुद्दिश्याजनादृतिद्रोषः २ अरुणंमातुर्ध्रुवशतायायत्रकुत्रापिस्थितं ३ सूर्योदग्धुमनायदाऽभूत्तदापूर्वादिशंगतवांतत्रसूर्य

चलतिनःस्वगात्रदयानिचानिशंनिर्गत्यतांवपुरिदमग्निसन्निभं तवद्युतिंकुपितकृतांतसन्निभांनिशाम्यनश्चलतिमनोव्यवस्थितं २५ प्रसीदनःपतग
पतेप्रयाचतांशिवश्चनोभवभगवन्भवावहः २५ एवंस्तुतःस्तूयमानैर्देवैःसर्षिगणैस्तदा तेजसःप्रतिसंहारमात्मनःसचकारह २६ इत्यादि
पर्वणिसौपर्णेरूक्षतिः सौतिरुवाच सस्तुत्वाथात्मनोदेहंसुपर्णःप्रेक्ष्यवत्सयं शरीरप्रतिसंहारमात्मनःसंप्रचक्रमे १ रूपर्णउवाच नमेस
र्वाणिभूतानिविभ्युर्देवदर्शनात् भीमरूपात्समुद्दिश्यास्मात्तेजस्कसंहरे २ सौतिरुवाच ततःकामगमःपक्षीकामवीर्योविहंगमः अरुणंवा
त्मनःपृष्ठमारोप्यसपितुर्गृहात् ३ मातुरंतिकमागच्छत्सरंतीरमहोदधेः तत्रारुणश्चनिक्षिप्तोदिशंपूर्वांमहाद्युतिः सूर्यःतेजोभिरत्यर्थंलोकान्द
ग्धुमनायदा ४ रुरुरुवाच किमर्थंभगवान्सूर्योलोकान्दग्धुमनास्तदा किमस्यापकृतंदेवैर्येनेमंमन्युराविशत् ५ प्रमितिरुवाच चंद्रादित्यौ
र्यदाराहुरास्यातोत्पतंतंपिबन् वैरानुबंधंकृतवांश्चंद्रादित्यतदानघ ६ वक्ष्यमानेग्रहेणाथआदित्यमन्युराविशत् सुरार्थायक्रमुत्सन्नोरोषारु
होरूक्षमांप्रति ७ बहूनर्थकरेपापेमकोहंसमवाप्नुयां सहायएवकार्येषुनचरुद्रेषुदृश्यते ८ पश्यंतियस्यमानंमांसहंतंवैदिवौकसः तस्मा
ल्लोकविनाशार्थंत्यक्तविष्ठेनसंशयः ९ राम

स्यारुणोनिक्षिप्तइतियोज्यं ४ ५ आदित्यस्यमूर्त्तिबहुत्वेनचंद्रादित्यौरितिबहुवचनं चंद्रादित्यैरित्येकत्वंचसमाहारात् ६ ग्रहेणराहुणाग्रहेणचा रु ७४
रणाअर्थायहिताय ७ ८ सहंतेमर्षयंति सहदेवैरितिपाठेदिवौकसःउपदेवाःमरीच्यादयः ९ श्रीरामरुक्मजयरामरुक्मजयजयरामरुक्म ६

तस्मादस्तावलेगत्वेतिल्यब्लोपेपंचमी संतापयतसमंतापयतअडभावआर्षः १० तिरोभूतएवसन्नेवंदहत्यादेयेनभस्मीकरिष्यतिलोकानित्याहततइत्यादिना ११ १२ ८

रवंकृतमतिःसूर्येत्यस्यमध्यगमद्धिरिं तस्माल्लोकविनाशायसंतापयतभास्करः १० ततोदेवानुपागम्यप्रोचुरेवंमहर्षयः अर्धाह्नेरात्रसमयेसर्वलोकभयावहः उत्पत्स्यतेम
हान्दाहस्त्रैलोक्यविनाशनः ११ ततोदेवाःसर्षिगणाउपागम्यपितामहं ऊचुर्विस्मयमापन्नाप्रणताःसर्वतोभृशं अब्रुवन्किमिवेदाद्यमहद्दाहकृतंभयं १२ ततावदृश्य
तेसूर्यःक्षयोयंप्रतिभातिच उदितेभगवन्भानौकथमेतद्भविष्यति १३ पितामहउवाच एषलोकविनाशायरविर्व्यूहमुद्यतः दृश्यतेवहिलोकान्सभस्मराशीकरिष्य
ति १४ तस्यप्रतिविधानंचविहितंपूर्वमेवहि कश्यपस्यकृतोधीमानरुणोत्यभिविश्रुतः १५ महाकायोमहातेजाःसज्ञास्यतिपुरोरवेः करिष्यतिचसारथ्यंतेजश्चास्य
हरिष्यति १६ लोकानांचास्तिचैवास्यादर्षीणांचदिवौकसां प्रमितिरुवाच ततःपितामहाज्ञातःसर्वंचक्रेतदारुणः उदितश्चैवसवितास्यरुणेनसमावृतः १७ ए
तन्नसर्वमाख्यातंयत्सूर्यमन्युराविशत् अरुणश्चययथैवास्यसारथ्यमकरोत्प्रभुः १८ भूयएवापरंप्रश्नंश्रोतुमर्हस्यनघ पूर्वमुदाहृतं १९ इत्यादिपर्वणिसौपर्णे ७
सौतिरुवाच ततःकामगमःपक्षीमहावीर्योमहाबलः मातुरंतिकमागच्छत्सरंपारंमहोदधेः १ यत्रसाविनतातस्मिन्पणितेनपराजिता अतीवदुःखसंतप्तादासीभा
वमुपागता २ ततःकदाचिद्विनतांप्रणतांपुत्रसन्निधौ कालेवाह्यवचनंकद्रूरिदमभाषत ३ नागानामालयंभद्रेसुरम्यंवारुदर्शनं समुद्रकुक्षावेकांतेतत्रमांविधि
र्नेतनयेे ४ ततःरूपर्णमातानामवहत्सर्पमातरं पन्नगान्गरुडस्यापिमातुर्वचनचोदितः ५ ससूर्यमभितोयातिवैनतेयोविहंगमः सूर्यरश्मिपतप्तास्त्रमूर्छिताःपन्न
गाभवन् ६ तदवस्थान्सुतान्दृष्ट्वाकद्रूःशक्रमथास्तुवत् नमस्तेसर्वदेवेशनमस्तेबलसूदन ७ नमुचिघ्ननमस्तेस्तुसहस्राक्षशतावीपते सर्पाणांसूर्यतप्तानांवारिणा
त्वंप्रभोभव ८

श्यनपश्यनूर्ध्वोरुतिगणत्वात्दीर्घोरपित्यार्थेयकु १४ प्रतिविधानंप्रतीकारः १५ १८ १९ अध्यायः तनवति १ ५ अभितःसमुखंभवन्प्रभवन् ६ अत्रापीडोपाधिकं

ब्रह्मस्तुत्येन नमस्तेऽस्त्वादिना लोकस्रष्टृत्वसंहर्तृत्वादिलिंगदर्शनात् ७ ११ ज्योतिश्चिद्रूपं १२ सर्वममृतंमोक्षः आपेक्षिकेऽमृतत्वेसर्वत्वंनास्ति मोक्षवक्ष्यमाणंयद्रूपंतत्तत्त्वमेवेत्यर्थः सोमईश्वरःपरमैःश्रेष्ठैरर्चितः सोमःपवतेजनितामतीनांजनितादिवोजनितापृथिव्याः जनिताग्नेर्जनितासूर्यस्यजनितेदंस्यजनितोतविष्णोरितिश्रुतिप्रसिद्धः १३ बडुलःशुक्लपक्षः १४ कालोपादानत्वात्तद्रूपत्वमुक्तंभूयोभांवुरूपत्वमाह त्वमुत्तमंमति १५ यज्ञभोक्तापित्वमेवेत्याह महायशाइति १६ यज्ञफलदोपित्वमेवेत्याह त्वांवप्रेरिति

त्वमेवपरमत्राणमस्माकममरोत्तम ईशोत्थसिपयःसृष्टंत्वमनल्पंपुरंदर ९ त्वमेवमेघस्त्वंवायुस्त्वमग्निर्विद्युतोदरे त्वमभ्रगणविक्षेप्तात्वमेवाऽर्महाघनं १० त्वंवज्रमतुलंघोरंघोषवांस्त्वंबलाहकः स्रष्टात्वमेवलोकानांसंहर्तात्वापराजितः ११ त्वंज्योतिःसर्वभूतानांत्वमादित्योविभावसुः त्वंमहद्भूतमाश्चर्यंत्वंरात्रिर्ध्रुवंत्वंकरोत्तमः १२ त्वंविष्णुस्त्वंसहस्राक्षस्त्वंदेवस्त्वंपरायणं त्वंसर्वममृतंदेवत्वंसोमःपरमार्चितः १३ त्वमुडूनक्षत्रिथिस्त्वंबलंबलस्त्वंपुनःक्षणः शुक्लस्त्वंबडुलस्त्वंकलाकाष्ठाऋटिस्तथा संवत्सरस्त्वंवोमासाऋतव्यश्चदिनानिच १४ त्वमुत्तमासागिरिवनावसुंधरासभास्करंवितिमिरंबरंतथा महोदधिःसतिमितिमिंगिलस्तथामहोर्मिमान्वडुमकरोझषाकुलः १५ महायशास्त्वमितिसदाभिपूज्यसेमनीषिभिर्मुदितमनामहर्षिभिः अभिष्टुतःपिबसिवसोममध्वरेषड्ङ्गतान्यपिचहवींषिभूतये १६ त्वंविप्रैःसततमिहेज्यसेफलार्थंवेदांगेष्वतुलबलौघगीयसेच त्वद्भक्तोर्यजनपरायणाहिजेंद्रावेदांगान्यभिगमयंतिसर्वयत्नैः १७ इत्यादिपर्वणिसोपर्णे ७

त्वद्भक्तोस्त्वत्प्राप्तये विधिदृष्टंतियज्ञेनेत्यादिश्रुतेः वेदांगानिषड्यज्ञसाद्गुण्यार्थं तत्रशिक्षापाठशुध्यर्थंकल्पःप्रयोगज्ञानार्थंव्याकरणंऊहादिसिद्ध्यर्थं छंदोगाय ज्योत्याज्यानुवाक्याभवंतीतिविध्यपेक्षितगायत्र्यादिज्ञानार्थंनिरुक्तंवेदार्थज्ञानार्थंज्योतिषंकर्मकालज्ञानार्थंमितिएतान्येववेदांगानि १७ इत्याध्यायः ६ ७५

हर्योःश्वाःवाहेनरथेयस्यसमहरिवाहनः १ २ संवर्तितंसंवर्तःसकल्पांतःसंजातोग्निमितिसंवर्तितमिव २ ४ सततासारेत्यनवच्छिन्नधारासंपातेनयास्यान्वया ५ ७

सौतिरुवाच एवंस्तुतस्तदाकृष्णोभगवान्हरिवाहनः नीलजीमूतसंघातैःसर्वमंबरमावृणोत् १ मेघानाज्ञापयामासवर्षध्वममृतंशुभं तेमेघास्तुसौम्यायप्रभूतंविद्युदुज्ज्वलाः २ परस्परमभासार्थंगर्जंतःसततंदिवि संवर्तितमिवाकाशंजलदैःक्रमहाद्युतैः ३ सृजद्भिरतुलंतोयमजस्रंक्रमहारवैः संप्रवृत्तमिवाकाशंधाराभिरनेकशः ४ मेघस्तनितनिर्घोषैर्विद्युत्सवनकंपितैः तैर्मेघैःसततासारंवर्षद्भिरनिशंतदा ५ नष्टचंद्रार्ककिरणमंबरंसमपद्यत नागानामुत्तमोहर्षस्तत्पावर्षतिवासवे ६ आपूर्यतमहीचापिसलिलेनसमंततः रसातलमनुप्राप्तंशीतलंविमलंजलं ७ नद्योभूरभवंश्चाशु जलोर्मिभिरनेकशः रामणीयकभागेऽस्मिन्नासन्भुजंगमाः ८ इत्यादिपर्वणिसौपर्णे सौतिरुवाच संप्रहृष्टास्ततोनागाजलधारापुनास्तदा सुपर्णेनोह्यमानास्तेजग्मुस्तंद्वीपमाशुवै १ तद्रूपंमकरावासंविहितंविश्वकर्मणा तच्चतेलवणंघोरंददृशुःपूर्वमागताः २ सुपर्णसहितास्तत्र्याःकाननंचमनोरमं सागरांबुपरिक्षिप्तंपक्षिसंघनिनादितं ३ विचित्रफलपुष्पाभिर्वनराजीभिरावृतं भवनैरावृतैरम्यैस्तथापद्माकरैरपि ४ प्रसन्नसलिलैश्चापिह्रदैरर्कैर्विभूषितं दिव्यगंधवहैःपुण्यैर्मारुतैरुपजीवितं ५ उत्पतद्भिरिवाकाशंवृक्षैर्मलयजैरपि शोभितंपुष्पवर्षाणिमुंचद्भिर्मारुतेरितैः ६ वायुविक्षिप्तकुसुमैस्तथान्यैरपिपादपैः किरद्भिरिवनभस्तत्रागान्पुष्पांबुवृष्टिभिः ७

रामणीयकद्वीपविशेषं ८ अध्यायः तंद्वीपंरामणीयकमेव १ लवणंलवणाकरंपूर्ववदस्तु:पुनर्गमनेसनास्तीतिभावः २ ३ पद्माकरैःसरोभिः ४ द्रुमैःनरोषुगभीरपरे शैः ५ ६ ७

मनःसंहर्षयन्नातमनःसंहर्षनं जनेःसर्वविभन्नुपपदातऽः प्रजापतेर्योमनःसंहर्ष संकल्पोल्लासस्तज्जनना ८ सर्वेगुणैरतिशेषः ९ १० सुरम्यंरतोपिरमणीयं ११
१२ दुर्योगात्दुष्टभावात्वितथं सुकूपिरुस्मत्वंदृष्ट्वा सर्पैर्वालभूतैः उपाधिनाछलेन १२ १४ धनकीतोक्रियार्थंरुपणजितोवादास्यंकरोतितेषांमुक्तिःदानेनवि

मनःसंहर्षजंदिव्यंगंधर्वाप्सरसांप्रियं मन्नःश्रमरसंघुष्टंमनोज्ञाकृतिदर्शनं ८ रमणीयंशिवंपुण्यंसर्वेजनमनोहरं नानापक्षिरुतैरम्यंकुसुमप्रह
र्षणं ९ तत्रवनंसमासाद्यविजकुःपन्नगास्तदा अब्रुवंश्चमहावीर्यंसुपर्णंपतगेश्वरं १० वहास्मानपरद्वीपंसुरम्यंविमलोदकं तेहिदेशान्बहून्र
म्यान्व्रजन्त्यस्मिन्सरोवर ११ सविचित्याब्रवीत्सर्पीमातरंविनतांतदा किंकारणंमयामातःकर्तव्यंसर्पभाषितं १२ विनतोवाच दासीभूतास्मि
दुर्योगात्सपत्न्याःपतगोत्तम पणंवितथमास्थायसर्पैरुपधिनाकृतं १२ सौतिरुवाच० तस्मिंस्तुकथितेमात्राकारणेगगनेचरः उवाचवचनंसर्पा
स्तिनदुःखेनदुःखितः १४ किमात्मत्राविरिक्षावाकिंवाकृत्वेहपौरुषं दास्याद्दोविप्रमुच्येयंतथ्यंवदतिलेलिहाः १५ सौतिरुवाच अथतंमब्रुवन्सर्पा
आहरामृतमोजसा ततोदास्याद्विप्रमोक्षोभवितातवरेवर १६ इत्यादिपर्वणिसौपर्णे सौतिरुवाच इत्युक्तोगरुडःसर्पैस्ततोमात
रमब्रवीत् गच्छाम्यमृतमाहर्तुंभक्ष्यमिच्छामिवेदितुं १ विनतोवाच समुद्रकुक्षावेकांतेनिषादालयमुत्तमं निषादानांसहस्राणितान्भुक्त्वाम्म
तमानष २ नचतेब्राह्मणंहंतुंकार्यावुद्धिःकथंचन अवध्यःसर्वभूतानांब्राह्मणोह्यनलोपमः ३

धालोभेनपणंतत्कृतेनराभवतीतिकिमेतेषुमयाकर्तव्यमित्याह किमिति लेलिहाःभोसर्पाः १५ १६ इत्यध्यायः इत्युक्तवतीति १ २ २ छ

४ ९ वदिरांमत्स्यादिधरणार्थोगलग्रहः १० हार्दात्स्नेहात् ११ १२ विप्रकृतावंचिना १३ १४ दृढ्आसतीतिपाठेआसीनावक्षिप्तेदिकारणज्ञापकात्अनुदात्ति

अग्निरर्कोविषंशस्त्रंविप्रोभवतिकोपितः एवमादिभिरूपैस्तुसतांवैब्राह्मणोमतः ४ सतेतातनहंतव्यःसंकुद्धेनापिसर्वथा ब्राह्मणनामनिद्यो
होनकर्तव्यःकथंचन ५ नहेवमग्निर्नादित्योभस्मकुर्यात्तथानघ यथाकुर्यादभिक्रुद्धोब्राह्मणःशंसितव्रतः ६ तदेतैर्वविधैर्लिंगैस्त्वंविद्यास्तं
द्विजोत्तमं भूतानामग्रभूर्विप्रोवर्णश्रेष्ठःपितागुरुः ७ गरुडउवाच किंरूपोब्राह्मणोमातःकिंशीलःकिंपराक्रमः किंस्विदग्निर्भवतिकिंस्वि
त्सौम्यप्रदर्शनः ८ यथाहमभिजानीयांब्राह्मणंलक्षणैःशुभैः तन्मेकारणतोमातःप्रब्रूतोवक्तुमर्हसि ९ विनतोवाच यस्तेकंठमनुप्राप्तोनिगीर्णंविदिशंय
था दहेदग्निस्वयुक्तंविद्याद्ब्राह्मणर्षभं १० विप्रस्त्वयावहंतव्यःसंकुद्धेनापिसर्वदा सौतिरुवाच शेषावचैनंविनतापुत्रहार्दादिदंवचः ११ जठरेनवजी
र्येयंस्तजानीहिद्विजोत्तमं पुनःशेषावचैनंविनतापुत्रहार्दादिदंवचः १२ जानंत्यप्यतुलंवीर्यमासीर्वादपरायणा प्रीतापरमदुःखार्तानागीर्वप्रकृतासती
१२ विनतोवाच पक्षौतेमारुतःमातुर्वदस्यैवंवदतः शिरश्चपावकिर्हस्तेवसवःसर्वतस्तनुं १४ अहंचतेसदापुत्रशांतिस्वस्तिपरायणा दहासीनाभ
विष्यामिस्वस्तिकारेरतासदा १५ अरिष्टंव्रजपंथानंपुत्रकार्यार्थसिद्धये सौतिरुवाच ततःसमातुर्वचनंनिशम्यविनतयपसौनमउत्पपात ततोनिषादा
ञ्चलवाञ्जपागतोबुभुक्षितःकालइवांतकोपरः १६ सतंनिषादानुपसेहरंस्तदारजःसमदूयनभःस्पृशंमहत् समुद्रकुक्षौवविशोषयन्पयःसमीपजा
न्भूधरजान्विवालयन् १७

त्वलक्षणस्यात्मनेपदस्यानित्यत्वात्आसेःशतपत्ययः स्वस्तिकारेकल्याणकरणे १५ अरिष्टंनिर्विघ्नंयथास्यात्तथा १६ भूधरजानूपर्वतजानूरुहान् १७ श्रीरामवंशायन

भुंजगभोजिनागरुडस्य १८ १९ परिवपलः नेषांग्रहणायसर्वनोश्रमनू २० अध्यायः तस्येति १ २ ३ संभावयजीवय ४ ५ ६ दृष्ठआख्यातवांश्चवस्यमा

ततःसचक्रेमहदाननंतदानिषादमार्गप्रतिरुध्यपक्षिराट् ततोनिषादास्त्वरिताःप्रवव्रजुर्यतोमुखंतस्यभुंजगभोजिनः १८ तदाननंविवृतमतिप्र
माणवत्समभ्ययुर्गगनमिवार्दिताःखगाः सहस्रशःपवनरजोविमोहितायथानिलप्रचलितपादपेवने १९ ततःखगोवदनमभिव्रतापनःसमाह
रत्परिवपलोमहाबलः निधूदयन्चक्रविधूमत्स्यजीविनोबुभुक्षितोगगनचरेश्वरस्तदा २० इत्यादिपर्वणिसौपर्णे सौतिरुवाच तस्य
कंठमनुप्राप्तोब्राह्मणःसहभार्यया दहन्हृदीप्तइवांगारस्तमुवाचातिरुषान्वितः १ द्विजोत्तमविनिर्गच्छवर्णमास्वादयात्मनः नहिमेब्राह्मणोव
ध्यःपापेषुपतितरस्तदा २ ब्रुवाणमेवंगरुडंब्राह्मणःप्रत्यभाषत निषादीमेभार्यैषनिर्गच्छतुमयासह ३ गरुडउवाच एतामपिनिषादीत्वंपरिग्र
ह्यशुनिपत तूर्णंसंभावयात्मानमजीर्णममनेजसा ४ सौतिरुवाच ततःसविप्रोनिष्क्रांतोनिषादीसहितस्तदा वर्द्धयित्वाचगरुडमिष्टदेशं
जगामह ५ सहभार्येविनिष्क्रांतेतस्मिन्विप्रेचपक्षिराट् वितत्यपक्षवाकाशेमुत्पपातमनोजवः ६ ततोपश्यत्सपितरंदृष्ठश्चारव्यात
वान्पितुः यथान्यायमभेद्यात्मांचोवाचमहानृषिः ७ कश्यपउवाच कच्चिद्दुःकुशलंनित्यंभोजनेवडुलंसुत कच्चिच्चमानुषेलोकेतवा
नेविद्यतेवडु ८ गरुडउवाच मातामेकुशलाशश्वतयाभ्रातानथाह्यहं नहिमेकुशलंतातभोजनेवडुलेसदा ९ अहंहिसर्पैःप्रहितःसो
ममाहर्त्तुमुत्तमं मातुर्दास्यविमोक्षार्थमाहरिष्येतमयवै १०

रामायणम् ७७

णरीत्या ७ वःयुष्माकंभ्रातश्चातापेक्षयावडुलं ८ भोजनेवडुले विषयेममकुशलंनहिघृणाहारस्याभावात् ९ सोमं अमृतं १० श्रीगजाननायनमः

११ १२ कूर्मौग्रजंकूर्मश्रेष्ठंज्येष्ठभ्रातरं १३ १४ १५ विभागंकरिष्यामीतिकीर्तयत्येवनतुकृतवान् १६ १७ अमित्राःशत्रवःअंतरेषुछिद्रेषुपतंति अन्योन्य

मात्रावात्रसमादिष्टोनिषादान्भक्षयेतिह नचमेतद्विरभवद्भक्षयित्वासहस्रशः ११ तस्माद्भक्ष्यंत्वमपरंभगवन्प्रदिशास्वमे यदुत्कामत
माहर्त्तुंसमर्थस्यामहंप्रभो क्षुत्पिपासाविघातार्थेभक्ष्यमाख्यातुमर्हसि भवान् १२ कश्यपउवाच ह्रदंसरोमहापुण्यंदेवलोकेपिविश्रुतं यत्र
कूर्मोग्रजंहस्तीसदाकर्षत्यवाङ्मुखः १३ तयोर्जन्मोत्तरेवैरंसंप्रवक्ष्याम्यशेषतः तन्मेतत्त्वंनिबोधस्वयत्समाणोचतावुभौ १४ आसीद्वि
भावसुर्नाममहर्षिःकोपनोभृशं भ्रातातस्यानुजश्चासीत्सुप्रतीकोमहातपाः १५ सनेष्टतिधनंभ्राता सहैकस्थंमहामुनिः विभागंकी
र्तयत्येवंसुप्रतीकोहिनित्यशः १६ अथाब्रवीच्चतंभ्रातासुप्रतीकंविभावसुः विभागंबहवोमोहात्कुर्वंतिमुष्टबुद्धयः १७ ततोवि
भक्तास्त्वन्योन्यंविरुध्यंतेऽर्थमोहिताः ततःस्वार्थपरान्मूढान्भृशंभूतान्स्वकैर्धनैः १८ विदित्वाभेदयंत्येतानमित्रामित्ररूपिणः
विदित्वाचापरेनित्यानंतरेषुपतंत्यथ १९ नित्यानामतुलोनाशःक्षिप्रमेवप्रवर्त्तते तस्माद्विभागंभ्रातॄणांनप्रशंसंतिसाधवः २०
गुरुशास्त्रनिबद्धानामन्योन्येनाभिशंकिनां नियंतुंनहिशक्यस्त्वंभेदतोधनमिच्छसि २१ यस्मात्तस्मात्सुप्रतीकहस्तित्वंसमवाप्स्यसि
शापस्त्वेवंसुप्रतीकोविभावसुमथाब्रवीत् २२ त्वमप्येतज्जलचरःकच्छपःसंभविष्यसि एवमन्योन्यशापात्तौसुप्रतीकविभावसू २३

स्थिरहरणिवद्भूमौहस्तनाशहेतुर्वरमुद्दीपयंतीत्यर्थः १९ २० कनिष्ठास्तुत्ववरस्थेज्येष्ठोभातापितुःसमइतियुरुशास्त्रंअलंघनीयेशासनेष्वनिबद्धानांअभि
शंकिनांमर्यादाभंगभयेन २१ २२ श्राख्यानतात्पर्यमाह एवमिति लोभान्नामसंयोगंगच्छंतीतिभावः २३ श्रीरामजयरामजयजयराम हू

२४ २६ आविष्टितकरःकुंडलीकृतशुंडादंडः २७ २८ ३० उपयुज्यभुक्ता ईहितंईप्सितं ३१ ३४ नेतुभ्यंबलंदास्यंतीतिशेषः ३५ ३७ सौलंबंसः

गजकच्छपतांप्राप्तावथार्थमूढचेतसौ रोषदोषानुषंगेनतिर्यग्योनिगतावुभौ २४ परस्परद्वेषरतौप्रमाणबलदर्पितौ सरस्यस्मिन्महाका
यौपूर्ववैरानुसारिणौ २५ तयोरन्यतरःश्रीमान्समुपैतिमहागजः यस्यदृढंहितग्राहैर्नकूर्मोयंतर्जलेशयः २६ उत्थितोसौमहाकायःकु
लंविक्षोभयन्सरः यंदृष्ट्वाविष्टितकरःपतत्येषगजोजलं २७ दंतहस्तायलांगूलपादवेगेनवीर्यवान् विक्षोभयंस्ततोनागःसरोबहुझ
षाकुलं २८ कूर्मोप्युद्यतशिरायुद्धायाभ्येतिवीर्यवान् षडुच्छ्रितोयोजनानिगजस्तद्द्विगुणायतः २९ कूर्मस्त्रियोजनोत्सेधोदशयोजन
मंडलः तावुभौयुद्धसंमत्तौपरस्परवधैषिणौ ३० उपयुज्यासुकूर्मेदंसाधयेहितमात्मनः महाघनसंकाशंतंभुक्त्वाऽमृतमानय २१
महागिरिसमप्रख्यंघोररूपंबलान्वितं सौतिरुवाच इत्युक्तागरुडंसोथमागत्यामृतरक्षिणं ३२ युध्यतःसहदेवैस्तेशुभंभवतुमं
गलं पूर्णकुंभोद्विजागावोयच्चान्यत्किंचिदुत्तमं ३३ शुभंस्वस्त्ययनंचापिभविष्यतितवांडज युध्यमानस्यसंग्रामेदेवैःसार्द्धंमहाब
ल ३४ ऋचोयजूंषिसामानिपवित्राणिहवींषिच रहस्यानिचसर्वाणिसर्वेवेदाश्रितेबले ३५ इत्युक्तोगरुडःपुत्रागतस्तंक्रूरमंतिका
त् अपश्यन्निर्मलजलेनानापक्षिसमाकुलं ३६ सनलम्बतापितुर्वाक्यंनीमवेगोंतरिक्षगः नखेनगजमेकेनकूर्ममेकेनचाक्षिपत् ३७
समुत्पपातचाकाशंगतश्चैर्विहंगमः सौलंबंतीर्थमासाद्यदेवदृष्टानुपागमत् ३८ तेभीताःसमकंपंततस्यपनिलाहताः ननोभंज्यादि
दितदाद्दिव्याःकनकशाखिनः ३९

राम ७८

अलंबेनिरालंबेयथास्यात्तथा गगनमार्गेणतीर्थमासाद्यसौतेमेरुशृंगमासाद्यदृष्टान् आरोढुं ३८ कनकेकनकाचलेस्थिताःशाखिनःकनकशाखिनः ३९

४० ४१ रोध्यवरोहिणोवटःस्वार्थेतद्धितःराक्षसवायसादिवत् रोहीरोहितकेऽश्वत्थवटपादपयोःपुमानितिमेदिनी ४२ ४४ अध्यायः सृष्टमिति १ ५ अति

प्रचलागान्समादृष्वामनोरथफलद्रुमान् अन्यानतुलरूपांगानुपपक्षामरेश्वरः ४० कांचनैराजतैश्चैवफलैवैदूर्यशाखिनः सागरांबुपरिक्षिप्ता
न्भ्राजमानान्महाद्रुमान् ४१ तमुवाचखगश्रेष्ठंतत्ररोहिणपादपः अतिप्रवृद्धःक्रूरमहानापतंतंमनोजवं ४२ यैषाममहाशाखाशतयोजन
मायता एतामाश्रयशाखांलंबकादिमौगजकच्छपौ ४३ ततोद्रुमंपतगसहस्रसेवितंमहीधरप्रतिमवपुःप्रकंपयन् खगोत्तमोद्रुतमभिपत्यवे
गवान्बभंजतामविरलपत्रसंचयां ४४ इत्यादिपर्वणिसौपर्णे सौतिरुवाच स्रष्टमात्रातुपक्षांसागरुडेनबलीयसा अभज्यत
तरोःशाखामम्बांचनामधारयत् १ तांभंक्त्वांसमहाशाखांस्वयमानोविलोकयन् अथात्रलंबतोपश्यद्बालखिल्यानधोमुखान् २ ऋषयोत्र
लंबतेनहन्यामितितानृषीन् तपोरतांलंबमानान्त्रिलपश्चाभिवीक्ष्यसः २ अन्यदेतासंपतंतीशाखेत्यथविचिंत्यसः नखेरदृढतरंवीरः
संगृह्यगजकच्छपौ ४ सतद्विनाशसंत्रासादभिपत्यखगाधिपः शाखामास्येनजग्राहतेषामेवान्ववेक्षया ५ अतिदैवंनुतत्तस्यकर्मदृष्वाम
हर्षयः विस्मयोलंपतद्दयानावक्रुर्महाखगे ६ गुरुंभारंसमासाद्योड्डीनएषविहंगमः गरुडोरूखगश्रेष्ठस्तस्मात्पन्नगभोजनः ७ ततःशनैः
पर्यपतत्सहैःशैलान्प्रकंपयन् एवंसोन्यपतद्देशान्बहून्नगजकच्छपः ८ दयार्थंबालखिल्यानांनावस्थानमविंदत सगत्वापर्वतश्रेष्ठंगंध
मादनमंजसा ९ ददर्शकश्यपंतत्रपितरंतपसिस्थितं ददर्शतंपिताचापिदिव्यरूपंविहंगमं १०

देवंदेवैरपिकर्तुमशक्यं ६ गुरुमिति गुरुशब्दःपूर्वाडुड्डविहायसागतौ अस्मात्डुः आदेरकारश्चरषोदरादित्वात् गरुत्मान्पक्षीभिधानमित्यर्थः ७ १०

११ अचिंत्यमद्भुताकारत्वात्अनभिध्येयंक्रूरमूर्त्तित्वात् तंदेवाहमर्वेति १२ १४ बालखिल्याःमरीचिपाःसूर्यमरीचीनिवपीत्वातृप्यंति असौवाआदि

तेजोवीर्यबलोपेतंमनोमारुतरंहसं शैलशृंगप्रतीकाशंब्रह्मदंडमिवोद्यतं ११ अचिंत्यमनभिध्येयंसर्वभूतभयंकरं महावीर्यधरंरौद्रंसा क्षादग्निमिवोद्यतं १२ अप्रधृष्यमजेयंचदेवदानवराक्षसैः भेत्तारंगिरिशृंगाणांसमुद्रजलशोषणं १३ लोकसंक्षोभनंघोरंरुतांतसमदर्श नं तमागतमभिप्रेक्ष्यभगवान्कश्यपस्तदा विदित्वास्यसंकल्पमिदंवचनमब्रवीत् १४ कश्यपउवाच पुत्रमासाहसंकाक्षीर्मासद्योल क्ष्यसेव्ययो मातोदहेयुःसंक्रुद्धाबालखिल्यामरीचिपाः १५ सौतिरुवाच ततःप्रसादयामासकश्यपःपुत्रकारणात् बालखिल्यान्महा भागांस्तपसाहतकल्मषान् १६ कश्यपउवाच प्रजाहितार्थमारंभोगरुडस्यतपोधनाः विकीर्षतिमहत्कर्मतदनुज्ञातुमर्हथ १७ सौतिरु० एवमुक्तामहाभागवतामुनयस्तेसमभ्ययुः मुक्ताशारवांगिरिंपुण्यंहिमवंतंतपोर्थिनः १८ ततस्तेघपयातेषुपितरंविनतासुतः शारवाव्याक्षिप्त वदनःपर्यपृच्छतकश्यपं १९ भगवन्कविमुंचामितरोःशारवामिमामहं वर्जितंमानुषैर्देशमाख्यानुभगवान्मम २० ततोनिःपुरुषंशैलं हिमसंरुद्धकंदरं अगम्यमनसाप्यन्यैस्तस्याचख्यौसकश्यपः २१ तंपर्वतंमहाकुक्षिमुद्दिश्यसमहाखगः जवेनाभ्यपतत्तार्क्ष्यःसशा खगजकच्छपः २२ ततोबध्नापरिणहेच्छतवर्मामहातनुः शाखिनोमहतीशारवांयांप्रगृह्यययौखगः २३

रामा ७९

लोदेवमधइत्यादिनाछंदोभ्यत्रसिद्धमधविद्यादित्यर्थः १५ शारवांमुक्तागिरिंसमभ्ययुरितिसंबंधः १६ १७ १८ शारवायामुखस्थाव्या क्षिप्तंविकलवदनंवचनक्रियायस्यसतथाअव्यक्तवर्णयथास्यात्तथा पृच्छदित्यर्थः १९ २० २१ २२ २३ ० ७

गजकच्छपयोःप्रमाणमुक्तंशारवायास्तदाह नतामिति परिणहेत्परितोबध्नीयात्वेष्टयेत् बध्नीएकतंतुकाचर्मरज्जुःशतचर्मीएकेनगोचर्मणाकृतया रज्जयाक्रांताभूर्गोचर्ममात्री इयंतुशतगोचर्मरज्जायनाक्रमणीयेत्यतिपुष्टत्वमुक्तंशारवायाः २३ २४ २५ २६ २७ २८ हेमविकचाःहेमवदुज्ज्व

सततःशतसाहस्रंयोजनांतरमागतः कालेननातिमहतागरुडःपतगेश्वरः २४ सतंगत्वाश्रमेनैवपर्वतंवचनात्पितुः अमुंचन्महतींशा रवांसस्वनंतत्रखेचरः २५ पक्षानिलहतश्चास्यशाकंपतसशैलराट् मुमोचपुष्पवर्षंचसमागलितपादपः २६ शृंगाणिचव्यशीर्यंतगिरे स्तस्यसमंततः मणिकांचनचित्राणिशोभयंतिमहागिरिं २७ शाखिनोबहवश्चापिशारवयाभिहतास्तया कांचनैःकुसुमैर्भांतिविद्युत्व तइवांबुदाः २८ तेहेमविकचाश्चमौयुताःपर्वतधातुभिः व्यराजंश्चाखिनस्तत्रसूर्यांशुप्रतिरंजिताः २९ ततस्तस्यगिरेःशृंगमा स्थायसखगोत्तमः भक्षयामासगरुडस्तावुभौगजकच्छपौ ३० तावुभौभक्षयित्वातुसतार्क्ष्यःकूर्मकुंजरौ ततःपर्वतकूटाग्रादुत्पपा तमहाजवः ३१ प्रावर्त्ततार्थदेवानामुत्पातभयशंसिनः इंद्रस्यवज्रंदयितंप्रजज्वालभयात्ततः ३२ सधूमान्यपतत्तार्क्षिदिवोल्कानभ सश्चकता तथावस्तूनांरुद्राणामादित्यानांचसर्वशः ३३ साध्यानामरुतांचैवयेचान्येदेवतागणाः स्वंस्वंप्रहरणंतेषांपरस्परमुपाददत् ३४ अभूतपूर्वंसंग्रामंतदादेवासुरेषिच ववुर्वाताःसनिर्घाताःपेतुरुल्काःसहस्रशः ३५

ला: २९ ३२ सधूमेति दिवाअग्नि ३३ अभूतपूर्वंयथा स्यात्तथाभादृवत् प्रहरणमायुधं जात्यभिप्रायेणैकवचनं ३४ सनिर्घाताःअशनिघातसहिताः उल्काःवह्निविस्फुलिंगसंघाः ३५ श्रीरामचंद्राय

देवानांदेवःपर्जन्यः ३७ ३८ ३९ अपराधात्वालखिल्यावमानात् प्रमादात्स्वबलदर्पेणअनवधानात् ४० ४१ असाध्यंअन्येषांसाधयेत् ४२ ४५ कव

निरभ्रमेववाकाशेप्रजगर्जमहास्वनं देवानामपियोदेवःसोऽयवर्षतशोणितं ३६ मल्लुर्माल्यानिदेवानांनेशुस्तेजांसिचैवहि उल्कातमेघारोदाश्च वहवुःशोणितंबहु ३७ रजांसिमुकुटान्येषामुत्सिक्तान्यधर्षयन् ततस्त्रासससमुद्विग्नःसहदेवैःशतक्रतुः उशनान्दारुणान्प्रस्थानिरूक्ष्य चबृहस्पतिं ३८ इंद्रउवाच किमर्थंभगवन्घोराउशनाःसहसोत्थिताः नचशक्नुंप्रपश्यामियुधियेनःप्रधर्षयेत् ३९ बृहस्पतिरुवाच तवापराधाद्देवेंद्रप्रमादाच्चशतक्रतो तपसावालखिल्यानांसंभूतोगरुडःकथं १ कश्यपस्यद्विजातिश्चकथंवैपक्षिराट्सुतः अध्यःसर्वभूतानामवध्यश्चाभवत्कथं २ क थंचकामचारीसकामवीर्यश्चखेचरः एतदिच्छाम्यहंश्रोतुंपुराणेयदिपठ्यते ३ सौतिरुवाच विषयोयंपुराणस्यन्मांत्वंपरिपृष्टवान् शृ णुमेवदतःसर्वमेतत्संक्षेपतोद्विज ४ यजतःपुत्रकामस्यकश्यपस्यप्रजापतेः साहाय्यमृषयोदेवागंधर्वाश्चददुःकिल ५ तत्रेध्मानयनेशक्रोनियुक्तःकश्यपेनह मुनयोबालखिल्याश्चयेचान्येदेवतागणाः ६ शक्रस्तुवीर्यसदृशमिध्मभारंगिरिप्रभं समुद्यम्यानयामासनातिहृष्टादिवप्रभुः ७ अथापश्यदृषीन्क्लान्यंगुष्ठोदरवर्ष्मणः पलाशवृत्तिकामेकोवहतःसंहतान्पथि ८

स्यवर्तमानसामीप्येवर्तमानवन्निर्देशः नियक्ष्यमाणस्येत्यर्थः ५ इध्मःअग्निसमिंधनार्थाःसमिधः ६ ७ अंगुष्ठोदरप्रमाणंवर्ष्मशरीरंयेषांतान् वृत्तिकांदीर्घयष्टीः संहतानेकीभूतान् ८

नानिधातुमयानिकंठादिनानिवर्णानि ४६ चर्माणिचर्ममयानिहस्तावापोर्ध्वमुखाप्रभृतीनि भानुमंतिदीप्तिमंति ४७ ४८ स्वदेहरूपाणिस्वदेहानुरूपाणि ४९

स्वेषुगेषुप्रलीनानिवातिरुरानित्यर्थः क्रियमानानितिगोष्पदमात्रेपिजलेमज्जनेनेत्यर्थः ९ १० जातमन्यवःदीनाः मन्युर्दैन्येक्रोधेकोशः ११ १२

प्रलीनान्स्वेषुवांगेषु निराहारांस्तपोधनान् क्रियमानान्मंदबलान्गोःपदेसंप्लुतोदके ९ तान्सर्वान्विस्मयाविष्टोवीर्योन्मत्तःपुरंदरः श्रवह स्याभ्यगाद्घ्रेलंघयित्वावमन्यच १० तेथरोषसमाविष्टाःरूक्षशंजातमन्यवः आरेभिरेमहत्कर्मतदाशक्रभयंकरं ११ ऋऊवुस्तेसु तपसोविधिवज्ज्ञातवेदसं मंत्रैरुचावचैर्विप्रायेनकामेनतर्पणु १२ कामवीर्यःकामगमोदेवराजभयप्रदः इंद्रोन्यःसर्वदेवानांभवे दितियतव्रताः १३ इंद्रश्चतगुणःशौर्येवीर्येचैवमहाजवः तपसानःफलेनाद्यदारुणःसंभवत्विति १४ तद्बुध्वाभृशसंतप्तोदेवराजः शतक्रतुः जगामशरणंतत्रकश्यपंसंशितव्रतं १५ तच्छ्रुत्वादेवराजस्यकश्यपोयप्रजापतिः वालखिल्यानुपागम्यकर्मसिद्धिमपृछत १६ एवमस्त्वितितंचापिप्रत्यूचुःसत्यवादिनः १७ तान्कश्यपउवाचेदंसांत्वपूर्वंप्रजापतिः श्रयमिंद्रस्त्रिभुवनेनियोगाद्वःसुरणःकृतः १८ इंद्रार्थेचभवंतोपियत्नवंतःस्तपोधनाः नमिथ्याब्रह्मणोवाक्यंकर्तुमर्हथसत्तमाः १९ भवतांहिनमिथ्यायंसंकल्पोवैचिकीर्षितः भवत्वेषपतत्रीणामिंद्रोतिबलसत्ववान् २० प्रसादःक्रियतामस्यदेवराजस्ययाचतः एवमुक्ताःकश्यपेनवालखिल्यास्तपोधनाः २१

पावाहितंवीर्यंगतिश्चयस्यितिकामवीर्यःकामगमाश्च १३ दारुणः इंद्रप्रत्येव १४ १५ कर्मसिद्धिमपृछतसिद्धंवःकर्मेत्यपृछदित्यर्थः १६ एवमस्तु सिद्धम् राम स्तु १७ १८ १९ पतत्रीणांपक्षिणांपतेरित्यूरुत्तौणादिकाविन्प्रत्ययांतोयं विविक्षुरपतत्रयइत्यमरः २० २१ श्रीसांबसदाशिवायनमः ६ ८१

प्रत्यूचुरभिसंपूज्यमुनिश्रेष्ठंप्रजापतिं वालखिल्याऊचुः इंद्रार्थेयंसमारंभःसर्वेषांनःप्रजापते २२ अपत्यार्थेसमारंभोभवतश्चायमीप्सितः तदिदंसफलंकर्मत्वयैवप्रतिगृह्यतां २३ तथाचैवंविधत्वात्त्वययाश्रेयोनुपश्यसि सौतिरुवाच एतस्मिन्नेवकालेतुदेवीदाक्षायणीशुभा २४ विनतानामकल्याणीपुत्रकामायशस्विनी तपतप्त्वाव्रतपरास्नातापुंसवनेशुचिः २५ उपचक्रामभर्त्तारंतामुवाचप्रजापतिः कश्यपः श्रारंभःसफलोदिविभवितायत्त्वयेप्सितः २६ जनयिष्यसिपुत्रौद्वौवीरौत्रिभुवनेश्वरौ तपसावालखिल्यानांममसंकल्पजौतथा २७ भविष्यतोमहाभागौपुत्रौत्रैलोक्यपूजितौ उवाचचैनांभगवान्कश्यपःपुनरेवह २८ धार्यतांमत्प्रसादेनगर्भोयंसुमहोदयः एतौसर्वपतत्रीणामिंद्रत्वंकारयिष्यतः २९ लोकसंभावितौवीरौकामरूपौविहंगमौ शतक्रतुमथोवाचप्रीयमाणःप्रजापतिः ३० तत्साहायेमहावीर्यौभ्रातरौतेभविष्यतः नेताभ्यांभवितादोषःसकाशात्तेपुरंदर ३१ चेतुतेशक्रसंतापस्त्वमेवेंद्रोभविष्यसि न वाप्येवंत्वयाभूयःक्षेप्तव्याब्रह्मवादिनः ३२ नचावमान्यादर्पान्नेवाग्वज्राभृशंक्रोपनाः एवमुक्तोजगामेंद्रोनिर्विशंकस्त्रिविष्टपं ३३ विनतावापिमिद्वार्थाविभ्रत्वमुदितातथा जनयामासपुत्रौद्वावरुणंगरुडंतथा ३४ विकलांगोरुणस्तत्रभास्करस्यपुरःसरः पतत्रीणांचगरुडमिंद्रत्वेनाभ्यषिंचत तस्येतत्कर्मसुमहच्छ्रूयतांभृगुनंदन इत्यादिपर्वणिसौपर्णेअध्यायः

नानरःहिरण्यगर्भः श्रभ्यषिंचत गरुडमिंद्रत्वेनाभ्यषिंचयंतेतिपाठेहिरण्यगर्भेणेतिशेषः ३५ अध्यायः

ततश्च ततस्मिन्देवानीकेतथाविधेनानायुधाद्युपेतेसमुदीर्णेसंग्रामायोद्यतेसति १ ततस्तेषांषष्ठ्यर्थेतसिः २ भौमनःविश्वकर्मा ३ विनिहतोमृतकल्पः

सौतिरुवाच ततस्तस्मिन्द्विजश्रेष्ठसमुदीर्णेतथाविधे गरुडःपक्षिराट्तूर्णंसम्प्राप्तोविबुधान्प्रति १ तंदृष्ट्वातिबलंचैवप्राकंपंतसुरास्ततः परस्परंवप्रत्यघ्नन्सर्वप्रहरणान्युत २ तत्रचासीद्भौमेयात्माविद्युदग्निसमप्रभः भौमनःसुमहावीर्यःसोमस्यपरिरक्षिता ३ सतेनपतगेंद्रेणपक्षतुंडनखस्तदः मुहूर्त्तमतुलंयुद्धंकृत्वाविनिहतोयुधि ४ रजश्चोद्धूयसुमहत्सप्रवातेनखेचरः कृत्वालोकान्निरालोकांस्तेनदेवानवाकिरत् ५ तेनावकीर्णास्तेजसादेवासोहमुपागमन् ववैवंदद्दशुश्चन्नारजसाःमृतरक्षिणः ६ एवंसलोडयामासगरुडस्त्रिदशालयं पक्षतुंडप्रहारैस्तदेवान्सविदद्दारह ७ ततोदेवःसहस्राक्षस्तूर्णंवायुमचोदयत् विक्षेपेमांरजोदृष्टिंतेवैदंकर्ममारुत ८ अथवायुरपोवाहतद्रजस्तरसावली ततोविनिर्मलैरजातेदेवाःशकुनिमार्दयन् ९ ननादोच्चैःसबलवान्महामेघइवाम्बरे वध्यमानःस्फरगणैःसर्वभूतानिभीषयन् १० उत्पपातमहावीर्यःपक्षिराट्परवीरहा समुत्पत्यांतरिक्षस्थंदेवानामुपरिस्थितं ११ वर्मिणोविबुधाःसर्वेनानाशस्त्रैरवाकिरन् पट्टिशैःपरिघैःशूलैर्गदाभिश्चसवासवाः १२ क्षुरैश्चैर्ज्वलितैश्चापिचक्रैरादित्यरूपिभिः नानाशस्त्रविसर्गैस्तैर्वध्यमानः समंततः १३ कुर्वन्सकृतमुत्युद्धंपक्षिराड्नन्यकंपत निर्दहन्निवचाकाशेवैनतेयःप्रतापवान् १४ पक्षाभ्यामुरसाचैवसमंताद्व्यक्षिपत्क

रान् १५ राम

कृतः ४ ६ संलोडयामासभ्याकुलीचकार७ ८ अपोवाहअपसारितवान् ९ १० अंतरिक्षंगरुडमितिशेषः ११ १२ व्यक्षिपत्विशेषेण क्षिप्तवान्१४ ८२

१५ १७ अश्वकेदादयोनवयक्षाः १९ २० २१ अतएवउक्तंजीवितान्मुक्तेत्याह २२ २२ नवत्याःनवतिःशताधिकाष्टसहस्राननीरितिबहुवचनात्सायनेकगुणास्तत्रानंतैर्मुखैरित्यर्थः नवत्योनवतीरितिपठितुंतामाऽभावआर्षः २४ समाप्तरत्राष्ठादितवान् शमितवान् अग्निमभिप्रशम्यप्रवेष्टुका

तेविक्षिप्तास्ततोदेवाद्रुद्रुवुर्गरुडार्दिताः नखतुंडक्षताश्चैवमुमुचुःशोणितंबहु १५ साध्याःप्राचींसगंधर्वावसवोदक्षिणांदिशं प्रजग्मुःसहितारुद्राःपतगेंद्रप्रधर्षिताः १६ दिशंप्रतीचीमादित्यानासत्यावुत्तरांदिशं मुहुर्मुहुःप्रेक्षमाणायुध्यमानामहौजसः १७ अश्वकंदेनवीरेणरेणुकेनवपक्षिराट् कर्कशेनचशूरेणनप्तृभिश्चविरोचनः १८ उल्कश्वसनाभ्यांचविमिषेणचपक्षिराट् प्रसृजेनचसंग्रामंचकारपुलिनेनच १९ तान्पक्षनखतुंडाग्रैरभिनद्विनतासुतः युगांतकालेसंक्रुद्धःपिनाकीवपरंतपः २० महाबलामहोत्साहास्तेनतेवद्रुधाक्षताः रेजुरभ्रघनप्रख्याःरुधिरौघप्रधर्षिणः २१ तानुत्क्रांतजीवितान् अतिक्रांतोमृतस्यार्थेसर्वतोग्निमपरयत २२ आदृष्टवानंमहाज्वालमार्चिभिःसर्वतोंबरं दहंतमिवतीक्ष्णांशुंचंडवायुसमीरितं २३ ततोनवत्यानवतीर्मुखानांकृत्वामहात्मागरुडस्तपस्वी नदीःसमापायमुखैस्ततस्तैःसुशीघ्रमागम्यपुनर्जवेन २४ ज्वलंतमग्निंतमभित्रतापनःसमाप्तरत्नत्वरयोनदीभिः ततःप्रवेक्ष्यंपुरन्यदल्पंप्रवेष्टुकामोग्निमभिप्रशाम्य २५ इत्यादिपर्वणिसौपर्णे सौतिरुवाच जांबूनदमयोभूत्वामरीचि निकरोज्वलः प्रविवेशबलात्सक्षीवारिवेगद्वार्णवं १

मःसोमसमीपमितिशेषः २५ अध्यायः जांबूनदमयेति प्रविवेशवक्ष्यमित्यंतेरणान्वयः १

